# शिक्षाधारा
# SHIKSHADHARA
(Annual Magazine of Department of Shiksha Shastri)

अधीक्षकः
प्रो. ए.पि. सच्चिदानन्दः
प्राचार्यः

प्रधानसम्पादकः
डा. चन्द्रकान्तः
विभागाध्यक्षः



सम्पादकौ

डा. रामचन्द्रुल बालाजी
सहाचार्यः

डा. नारायण वैद्य
अतिथिप्राध्यापकः


## राष्ट्रियसंस्कृतसंस्थानम्
भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविश्वविद्यालयः
राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'अ' श्रेण्या प्रत्यायितम्

राजीवगान्धीपरिसरः शृङ्गेरी – 577 139

2018–19

# शिक्षाधारा
# SHIKSHADHARA

(Annual Magazine of Department of Shiksha Shastri)


**अधीक्षकः**

प्रो. ए.पि. सच्चिदानन्दः
प्राचार्यः

**प्रधानसम्पादकः**

डा. चन्द्रकान्तः
विभागाध्यक्षः

**सम्पादकौ**

डा. रामचन्द्रुल बालाजी
सहाचार्यः

डा. नारायण वैद्य,
अतिथिप्राध्यापकः

**सम्पादकसमितिः**

डा. हरिप्रसादः के., सहायकाचार्यः
डा. गणेश ति. पण्डितः, सहायकाचार्यः
डा. वेङ्कटरमणभट्टः सहायकाचार्यः
डा. अरविन्दकुमारसोमदत्तः, अतिथिप्राध्यापकः



## राष्ट्रियसंस्कृतसंस्थानम्

भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविश्वविद्यालयः

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'अ' श्रेण्या प्रत्यायितम्

**राजीवगान्धीपरिसरः** शृङ्गेरी – 577 139

**2018–19**

Name of the Magazine : SHIKSHADHARA

© Department of Shikshashastra
RASTRIYA SANSKRIT SANSTHAN
(Deemed University)
Rajiv Gandhi Campus, Menase, SRINGERI
Chikkamagalur Karnataka – 577139

Year of Publication : 2019
No. of Copies : 150

Published by : Department of ShikshaShastra
RASHTRIYA SANSKRIT SANSTHAN
(Deemed University)
Rajiv Gandhi Campus, Menase, SRINGERI
Chikkamagalur Karnataka – 577139

Designed by : Sri K V Shashidhar
Rajiv Gandhi Campus,Sringeri

Printed At : Sri Maruthi Printers, Bangalore

* All rights are reserved for the Department and Writers are responsible for their respective articles.

आचार्यः ए. पि. सच्चिदानन्दः
प्राचार्यः (प्र)
राष्ट्रियसंस्कृतसंस्थानम्,
(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः, शृङ्गेरी – 577 139

Prof. A. P. Sachidananda
Principal (I/C)
RASHTRIYA SANSKRIT SANSTHAN
(Deemed University under MHRD Govt. of India)
Rajiv Gandhi Campus, Sringeri - 577 139



# शुभाशंसनम्

## जनयतु हर्षं शिक्षाधारा

राष्ट्रियसंस्कृतसंस्थानस्य "योऽनूचानः स नो महान्" इति ध्येयवाक्यम्। तदनुसृत्य राष्ट्रियसंस्कृतसंस्थानेन प्राचीनशिक्षातत्त्वानां पुनरध्ययनाय प्रचाराय च शिक्षाशास्त्रस्य पाठ्यक्रमः समारब्धः । "फलानुमेयाः प्रारम्भाः" इति न्यायानुसारं राष्ट्रियसंस्कृतसंस्थानं समस्तविश्वे संस्कृतशिक्षां विस्तारयामास । तथैव साम्प्रतमपि राष्ट्रियसंस्कृतसंस्थानस्य विविधेषु परिसरेषु शिक्षाशास्त्रपाठ्यक्रमः सञ्चाल्यते । तेषु राजीवगान्धीपरिसरः अपि अन्यतमः। अत्र महत्या श्रद्धया शिक्षाशास्त्रविषयपाठनेन सह पाठ्येतरकार्याण्यपि प्रवर्तन्ते। तत्र शिक्षाविभागीयैः प्राध्यापकैः छात्रैश्च मिलित्वा बहुभाषाभूयिष्ठेयं शिक्षाधारानाम्नी शिक्षाशास्त्रविभागीया वार्षिकी पत्रिका मनोज्ञया शैल्या सम्पादिता अस्तीति विज्ञाय मोमुदीति नश्चेतः।

एतस्मिन् पत्रिकासम्पादनकर्मणि सततं परिश्रमं कृतवद्भ्यां डा. रामचन्द्रुलबालाजी डा. नारायण वैद्य इत्येताभ्यां, मार्गदर्शनं दत्तवद्भ्यो शिक्षाशास्त्रविभागाध्यक्षेभ्यः डा. चन्द्रकान्तवर्येभ्यः, सहकृतवद्भ्यो विभागीयप्राध्यापकेभ्यः, छात्रेभ्यश्च मङ्गलं कामये।

सर्वान्ते सन्दर्भेऽस्मिन् शरदिन्दुसन्निभायाः शारदाम्बायाः, सुधांशुकलितोत्तमाङ्गस्य चन्द्रमौलीश्वरस्य, श्रीमज्जगद्गुरूणां श्री श्री भारतीतीर्थमहास्वामिनां तत्करकमलसञ्जतानां श्री श्री विधुशेखरभारतीमहास्वामिनाञ्च चरणकमलेषु प्रणतिततीः समर्पयामि।

विलम्बफाल्गुणतृतीयाशनिवासरः
२३-०३-२०१९

विद्वज्जनविधेयः

ए·पी·सच्चिदानन्दः

प्रो. ए.पि.सच्चिदानन्दः
प्राचार्यः (प्र)

# नित्यं विलसतु शिक्षाधारा



आचार्यः पूर्वरूपम्। अन्तेवास्युत्तररूपम्।
विद्या सन्धिः। प्रवचनं सन्धानम्। - तैत्तिरीयोपनिषत् १-३

एवं प्रकारेण तैत्तिरीयोपनिषदि शिक्षाया: त्रिमुखी प्रक्रिया स्पष्टा वर्तते । अनया प्रक्रियया ज्ञानं सम्पादयति अन्तेवासी। अत्र ज्ञानप्राप्तिरेव मानवस्य प्रधानं कर्तव्यम्। ज्ञानसम्पादनार्थं मुख्यं साधनं भवति शिक्षणम् । आचार्यस्य अनुग्रहेणैव शिष्य: ज्ञानार्जनं करोति । अस्यां प्रक्रियायां गुरुशिष्यौ प्रधानौ भवत:। एतयो: संयोगादेव शिक्षाप्रक्रिया साफल्यं भजते।

अस्यां दिशि शिक्षाविभागेन ज्ञानसम्पादनात्मकानि कर्माणि प्रतिवर्षमपि सम्पाद्यमानानि वर्तन्ते। तदनुअस्मिन् अपि वर्षे नैकविधानां शैक्षिककार्यक्रमाणां सञ्चालनेन सह शिक्षाधारानाम्नी शैक्षिकपत्रिका अपि प्रकाश्यं नीयत इति प्रमोदस्य विषय: वरीवर्ति । पत्रिकाया अस्याः सम्पादने नितरां यत्नशीलान् प्राध्यापकान् छात्रांश्च अभिनन्द्य एतदर्थं प्रेरणा शक्तिरूपेण विराजमानान् प्रणिपत्य शिक्षाधाराया: नैरन्तर्यार्थं जगद्गुरून् शारदाम्बाञ्च साष्टाङ्गं प्रणिपत्य छात्राणां समेषां मङ्गलमाशासे।

विलम्बफाल्गुणतृतीया शनिवासरः
२३-०३-२०१९

इत्थम्
डा.चन्द्रकान्तः
विभागाध्यक्षः, शिक्षाविभागः

# सम्पादकीयम्

संयोजयति विद्यैव नीचगापि नरं सरित्।
समुद्रमिव दुर्धर्षं नृपं भाग्यमतः परम्॥

इत्येवं सुभाषितं विद्याया: महत्त्वं बोधयति । अस्माभि: कस्यापि मानवस्य सर्वाङ्गीणविकासार्थं विद्याया: आवश्यकता अनुभूयते । विद्यया एव ऐहिकामुष्मिकं सुखम् अनुभवति मानव: ।

"सा विद्या या विमुक्तये" इति प्रसिद्धा उक्ति: । परमधुना अर्थकरी रूपेणावलोक्यते क्वचित्। अद्यत्वे छात्रा: केवलं पाठ्यक्रमं पठितुमिच्छन्ति। वस्तुत: विचार्यमाणे पाठ्यक्रमस्य अपेक्षया पाठ्यक्रमातिरिक्ता: पाठ्यसहगामिक्रिया: जीवनोपयुक्ता: भवन्ति । अत: यथा पाठ्यक्रमस्याध्ययने रुचि: तथैव तदितरेष्वपि विषयेषु आसक्ति: भवितुमर्हति। येन छात्राणां समुचितया रीत्या विकास: भवति।

पाठ्यसहगामिक्रियासु शैक्षिकपत्रिकाया: निर्माणमपि अन्तर्भवतीति सुविदितमेव । अनेन छात्राणां लेखनकौशलस्य विकास: जायते। इदम् उद्देश्यं मनसि निधाय शिक्षाशास्त्रविभागेन आबहुभ्य: वर्षेभ्य: शिक्षाधारानाम्नी शैक्षिकवार्षिकी पत्रिका प्रकाश्यते। अस्मिन्नपि शैक्षिकवर्षे एषा पत्रिका सज्जीकृता वर्तते । अस्याः पत्रिकायाः मूर्तरूपावाप्तेः परमनिधानभूताः भवन्ति श्रीमज्जगद्गुरूणां भारतीतीर्थमहास्वामिनां तत्करकमलसञ्जातानां विधुशेखरभारतीमहास्वामिनाञ्च आशिषः, जगदम्बायाः शारदाम्बायाः कृपा च । अतः तदीयचरणकमलेषु अस्माकं प्रणतिप्रसूनानि समर्पयावः ।

समयेपत्रिका सुष्ठु च प्रकाश्येत इत्येतदर्थं अस्मत्प्राचार्याः **आचार्याः सच्चिदानन्द उडुपवर्याः**नौ सम्प्रेर्य अनुगृहीतवन्त: । अतः तेभ्योऽत्र कार्तज्ञ्यकुसुमानि समर्पयावः । अस्माकं विभागाध्यक्षाः **डा.चन्द्रकान्तवर्याः** समये समये मार्गदर्शनं कृत्वा पत्रिकायाः सुष्ठु सम्पादने

साहाय्यम् अकुर्वन् । अत: तेभ्यः हृदयेन कृतज्ञतां प्रकटयावः । विभागीयाः सर्वेऽपि प्राध्यापकाः साहाय्यं कृतवन्त: । तेभ्योऽपि आवां कार्तज्ञ्यम् अर्पयाव: । एवमेव अस्याः पत्रिकायाः सम्पादनकर्मणि साहाय्यं कृतवन्तः बहवो हि शिक्षाशास्त्रिप्रथमद्वितीयवर्षच्छात्राः भृशं साधुवादैः अभिनन्द्यन्ते ।

पत्रिकाया: अस्याः पुटसज्जीकरणादिषु कर्मसु सङ्गणकप्राध्यापकस्य श्रीमत: शशिधरवर्यस्य साहाय्यं स्मर्यते । पुस्तकमिदं बहुजनज्ञानदानाय निदानं भूयादिति कामयावहे ।

इत्थं विद्वद्विधेयौ

दिनाङ्क: - २४.०३.२०१९

स्थानम् - शृङ्गेरी

डा. रामचन्द्रलुबालाजी

डा. नारायण वैद्य

# शिक्षाविभागः



Dr. Chandrakant
Head of the Department



Dr. Ramachandrula Balaji
Asso.Professor



Dr. Hariprasad K
Asst. Professor



Dr. Ganesh T. Pandit
Asst. Professor



Dr. Venkataraman Bhat
Asst. Professor



Dr. Narayana Vaidya
Guest Teacher



Dr. Aravinda K Somadutt
Guest Teacher

# EDITORIAL BOARD



Prof. A.P. Sachidananda
Principal



Dr. Chandrakant
Chief Editor



Editors



Dr. Ramachandrula Balaji

Dr. Narayana Vaidya

## PUPIL TEACHERS IN EDITORIAL BOARD



Hanumantaray K D
Shiksha Shastri II



Madhumita Sahu
Shiksha Shastri II



Chinmaya Bhat
Shiksha Shastri I



Minsu Bagarti
Shiksha Shastri I

# कार्यालयीया: सदस्या:



**श्रीमती सीतालक्ष्मीः**
अनुभागाधिकारिणी



**श्री गुरुराजभट्टः**
कार्यालयसहायकः



**श्री. एस्. आर्. चन्द्रशेखरः**
यू. डि. सि.



**श्रीमति मञ्जुळा एस्.**
एल्. डि. सि.



**श्री दिनेशः एस्.**
एम. टि. एस्. (ग्रन्थालयः)



**श्री एच्. के. कुमारः**
एम्. टि. एस्.



**श्री एस्. शिवण्णः**
एम्. टि. एस्.



**श्रीमती सिद्दम्मा**
एम्. टि. एस्. (ग्रन्थालयः)



**श्री एम्. रफीकः**
एम्. टि. एस्.



**श्रीमती जयम्मा**
स्वच्छताकर्मचारिणी

# बाह्यसंस्थया नियुक्ताः कार्यालयीयाः सदस्याः



श्रीमती सौम्या बि. टि.
डि. ई. ओ.



श्रीमती शारदा एस्. आर्.
डि. ई. ओ.



श्रीमती सावित्री टि. एन्.
छात्रावासनिरीक्षिका



कुमारि रश्मी एस्.
छात्रावासनिरीक्षिका



श्रीमती शुभा
एम्. टि. एस्.



श्री लोकेशः
छात्रावाससहायकः



श्री उमेशः एच्. एस्.
स्वच्छताकर्मचारी



श्रीमती तिम्मम्मा
स्वच्छताकर्मचारिणी



श्रीमती सुन्दरी
स्वच्छताकर्मचारिणी



श्रीमती पार्वती
स्वच्छताकर्मचारिणी



श्रीमती पद्मा
स्वच्छताकर्मचारिणी



श्रीमती अन्नपूर्णा
स्वच्छताकर्मचारिणी



श्री नागेशः एन्
उद्यानपालकः



श्री एम्. बि. शङ्करः
रक्षणकर्मचारी



श्री सदाशिव शेट्टि
रक्षणकर्मचारी



श्री के. एस्. चन्द्रप्पः
रक्षणकर्मचारी



श्री एम्. के. राजुः
रक्षणकर्मचारी



श्री रविः एम्. एस्.
रक्षणकर्मचारी



श्री एम्. वि. महेशः
रक्षणकर्मचारी



श्री एम्. जि. अप्पय्याचार्
रक्षणकर्मचारी



श्री सुब्रह्मण्यः एम्. बि.
रक्षणकर्मचारी

# सहकारः

शिक्षाशास्त्रिकक्ष्यायाः नैके छात्राः पत्रिकायाः सुचारुसम्पादनकर्मणि स्वीयं योगदानं विभिन्नरूपेण प्रायच्छन्। तेषां विवरणम् इत्थं वर्तते -

## प्रथमवर्षीयाः

| Responsibilities | Name of the Student |
|---|---|
| Proof Correction of all Sanskrit Articles | Ankush V Hegde |
| | Karthik Mishra |
| Proof Correction of Hindi Articles | Durgaprasad Bhatrai |
| | Umakant Joshi |
| Proof Correction of English Articles | T K Koushik |
| | Niharika |
| Proof Correction of Kannada Articles | Ramachandra Bhat |
| Typing | Vinay Kumar Shukla |
| | Srikant Nayak |
| Collecting the articles from students and Distributing the same to proof readers | Chinmaya Bhat<br>Minsu Bagarti |

## द्वितीयवर्षीयाः

| Responsibilities | Name of the Student |
|---|---|
| Proof Correction Sanskrit Articles | Vinay Kumar Bhagwat |
| | Madhumita Sahu |
| Proof Correction of All Hindi Articles | Navadeep Sharma |
| | Neeraj Pant |
| Proof Correction of Kannada Articles of Girls | Ganesh Ananta Bhat |
| Address and Photo Collection | Hanumantaraya K.D. |

# सत्रविवरणम्

**उद्घाटनम्**

श्रीशारदाम्बायाः परिपूर्णकृपाकटाक्षैः श्रीश्रीभारतीतीर्थमहास्वामिनां श्रीश्रीविधुशेखर-भारतीमहास्वामिनाञ्च अनुग्रहविशेषैः अस्मत्कुलपतीनामाचार्याणां प्रो.परमेश्वरनारायणशास्त्रिवर्याणां शुभाशीर्भिः शृङ्गगिरिक्षेत्रे विराजमानस्य राजीवगान्धीपरिसरस्य शिक्षाशास्त्रिविभागस्य २०१८-२०१९ शैक्षिकसत्रं १६-०७-२०१८ तमे दिनाङ्के परिसरप्राचार्याः प्रो.सच्चिदानन्दउडुपवर्याः समुदघाटयन् । कार्यक्रमेऽस्मिन् शिक्षाशास्त्रविभागस्य विभागाध्यक्षाः डा.चन्द्रकान्तमहोदयाः, प्राध्यापकाः डा.रामचन्द्रुलबालाजिवर्याः, प्राध्यापकाः डा॥हरिप्रसादमहोदयाः, कक्षाध्यापकाः प्राध्यापकाः डा.गणेश टि पण्डितमहाभागाः, प्राध्यापकाः डा.वेङ्कटरमणएस्भट्टमहाशयाः, अतिथिप्राध्यापकाः डा.नारायणवैद्यमहाभागाः, अतिथिप्राध्यापकाः डा.अरविन्दकुमारसोमदत्तवर्याश्च समुपस्थिता आसन्।

**संस्कृतसम्भाषणवर्गः**

शिक्षाशास्त्रिच्छात्राणां संस्कृतसम्भाषणक्षमतायाः वर्धनार्थम् आगष्टमासस्य ०२ तमदिनाङ्कादारभ्य आगष्टमासस्य १२ दिनाङ्कपर्यन्तं दशदिनानि संस्कृतसम्भाषणवर्गः समभवत् । श्रीराजेशवर्याः वर्गसञ्चालनमकरोत् । अस्य वर्गस्य समारोहकार्यक्रमः आगष्टमासस्य १४ दिनाङ्के अभवत्। अस्यसमारोहस्य अध्यक्षाः डा॥चन्द्रकान्तमहोदयाः आसन्।

**भाषाबोधनवर्गः**

शिक्षाशास्त्रिच्छात्राणां भाषाकौशलसम्पादनार्थं भाषाबोधनवर्गः सेप्टम्बरमासस्य २५ दिनाङ्कादारभ्य अक्टोबरमासस्य ०४ पर्यन्तं प्राचलत्। श्रीउमामहेश्वरमहोदयेन वर्गस्यास्य सञ्चालनं कृतम्। ०५ दिनाङ्के वर्गस्यास्य समापनकार्यक्रमः अजायत।

**साप्ताहिकसङ्गोष्ठी**

प्रशिक्षणाङ्गत्वेन कौशलविकासाय प्रतिशनिवासरं निश्चितविषयेषु गोष्ठ्यः सञ्चालिताः।

**हिन्दीसप्ताहः**

शिक्षाशास्त्रिच्छात्राणां व्यावसायिकक्षमतोन्नयनायजनवरीमासस्य ०२ दिनाङ्कतः ०७ दिनाङ्कपर्यन्तं हिन्दीसप्ताहः समाचरितः । हिन्दीसप्ताहेऽस्मिन् चतस्रः स्पर्धाः समायोजिताः आसन् । ०२ दिनाङ्के आशुभाषणस्पर्धा, ०४ दिनाङ्के निबन्धलेखनस्पर्धा, ०७दिनाङ्कस्य प्रातः ११ वादनतः १ वादनपर्यन्तं गीतगायनप्रतियोगिता, अपराह्णे वादविवादप्रतियोगिता च प्रचलिता आसीत् ।

**शिक्षणाभ्यासः**

शिक्षाशास्त्रिद्वितीयवर्षीयाणां छात्राध्यापकानां मासचतुष्टयात्मकः शिक्षणाभ्यासः संवत्सरेऽस्मिन् आगष्टमासस्य १६ दिनाङ्कतः दिसेम्बरमासस्य त्रयोदशदिनाङ्कं यावत् चक्रद्वये प्रावर्तत ।

**संस्कृतसप्ताहः**

शिक्षाशास्त्रिच्छात्राणां व्यावसायिकक्षमतोन्नयनाय दिसेम्बरमासस्य १८ दिनाङ्कतः २१ दिनाङ्कपर्यन्तं संस्कृतसप्ताहः समाचरितः । अस्मिन्सप्ताहे चतस्रः स्पर्धाः आयोजिताः आसन् । १८ दिनाङ्के संस्कृताशुभाषणप्रतियोगिता, १९ दिनाङ्के निबन्धलेखनप्रतियोगिता, २० दिनाङ्के वादविवादप्रतियोगिता, २१ दिनाङ्के श्रीमद्भगवद्गीताकण्ठपाठस्पर्धाश्च समायोजिताः आसन् ।

**सांस्कृतिकस्पर्धाः**

शिक्षाशास्त्रिच्छात्राणां व्यावसायिकक्षमतोन्नयनाय फेब्रवरीमासस्य ०५ तः ०७ पर्यन्तं सांस्कृतिकस्पर्धाः समभवन् । चतस्रः स्पर्धाः आयोजिताः अभूवन् । ०५ दिनाङ्कस्यप्रातः

गीतगायनस्पर्धा, अपराह्णे लघुरूपकस्पर्धा, ०६ दिनाङ्कस्य प्रातः रङ्गवल्लीनिर्माणस्पर्धा अपराह्णे सामूहिकनृत्यस्पर्धाश्च आयोजिताः अभूवन्।

**विद्यालयावबोधः**

हायनेऽस्मिन् शृङ्गेरी, तोरेहड्लु, हरिहरपुरं, कोप्पा इत्यत्र विद्यमानासु प्रौढशालासु डिसेम्बरमासस्य ०८ दिनाङ्कतः१५ दिनाङ्कपर्यन्तं छात्राध्यापकानां विद्यालयावबोधः प्राचलत्। शिक्षाशास्त्रिप्रथमवर्षीयाः छात्राः अत्र भागमगृह्णन्।

**प्रशिक्षणवर्गः**

हायनेऽस्मिन् नवेम्बरमासस्य १२ दिनाङ्कतः २२ दिनाङ्कपर्यन्तं संस्कृतसम्भाषणशिबिरसञ्चालनकौशलान्यवाप्तुं प्रशिक्षणवर्गः समजनि । अत्र सर्वेऽपि शिक्षाशात्रिच्छात्राध्यापकाः शिबिरसञ्चालनप्रशिक्षणं प्राप्तवन्तः।

**संस्कृतसम्भाषणशिबिरम्**

हायनेऽस्मिन् दिसेम्बरमासस्य १९ दिनाङ्कतः २७ दिनाङ्कपर्यन्तं बेंगलूरु, होन्नावर, बेलगावि, हावेरि, इत्यादि महाविद्यालयेषु समाजे च संस्कृतसम्भाषणशिबिरसञ्चालनं शिक्षाशास्त्रछात्राः अकार्षुः।

**क्रीडास्पर्धाः**

शिक्षाशास्त्रिच्छात्राणां व्यावसायिकक्षमतोन्नयनकार्यक्रमस्य अङ्गत्वेन कीडास्पर्धाः जनवरीमासस्य ०३ तः ०४ पर्यन्तं समभवन्।

**एकदिनात्मकराष्ट्रियसङ्गोष्ठी**

शिक्षाशास्त्रविभागस्य एकदिवसीया राष्ट्रियसङ्गोष्ठी मार्चमासस्य ०२ दिनाङ्के समजनि। अस्यां सङ्गोष्ठ्यां शिक्षाशास्त्रीपाठ्यक्रमस्य स्तरोन्नयनविषये बहवः पर्यभाषन्त।

**स्वच्छताभियानम्**

शिक्षाशास्त्रिच्छात्राणां व्यावसायिकक्षमतोन्नयनकार्यक्रमस्य स्वच्छताभियानम् अक्टोबरमासस्य २४ दिनाङ्के अस्माकं परिसरे अभवत्।

**सामान्यसङ्गणकज्ञानप्रशिक्षणवर्गः**

शिक्षाशास्त्रिछात्राणां व्यावसायिकक्षमतोन्नयनकार्यक्रमस्य अङ्गत्वेन सामान्यसङ्गणकज्ञानप्रशिक्षणवर्गः जनवरीमासस्य २५ दिनाङ्कतः २९ दिनाङ्कपर्यन्तं समभवत्। वर्गेऽस्मिन् सङ्गणकप्राध्यापकाः श्री शशिधर के. वि. महोदयाः सुचारु अबोधयन्।

**चित्रकलाप्रशिक्षणवर्गः**

शिक्षाशास्त्रिच्छात्राणां व्यावसायिकक्षमतोन्नयनकार्यक्रमस्य अङ्गत्वेन चित्रकलानिर्माणं, मृच्छिल्पमूर्तिनिर्माणं, रचनात्मककार्यक्रमादीनाञ्च वर्गाः समभवन्। वर्गेऽस्मिन् श्री वागीशवर्याः प्राबोधयन्। वर्गस्य अस्य संयोजकाः डा॥गणेशटिपण्डितवर्याः आसन्।

**संस्कृत-विकिपीडिया-कार्यशाला**

शिक्षाशास्त्रप्रथमवर्षीय-व्यावसायिकक्षमतोन्नयनकार्यक्रमान्तर्गतत्वेन संस्कृतविकिपीडिया-कार्यशाला २८/०१/२०१९ तमे दिनाङ्के सम्पन्ना । बेङ्गळुरुनगरस्थस्य अक्षरकार्यालयस्य संस्कृतविकिपीडियापरियोजनाप्रमुखाः श्रीमत्यः शुभा डि.वर्याः, सूर्यहेब्बारमहोदयःच अस्माकं शिक्षाशास्त्रिच्छात्रान् संस्कृतविकिपीडिया इत्यस्मिन् विषये उदबोधयताम् । अन्तर्जालमाध्यमेन संस्कृतप्रपञ्चस्य समग्रविवरणप्रदात्री संस्कृतविकिपीडिया अवश्यं सर्वैरपि संस्कृतज्ञैः छात्रैश्च उद्घाट्य द्रष्टव्या । किञ्च तत्र सम्पादनकार्याणि च करणीयानीति आग्रहं कृतवत्यः। संस्कृतविकिपीडिया कथं कार्यं करोति ? तत्र कार्यकरणाय के के विभागाः सन्ति ? तत्र कार्यकरणशैली का ? सम्पादनकार्याणि कथं कर्तव्यानि ? तत्र अवधेयाः अंशाः के ? इत्यादीनां विषये विस्तरेण प्रयोगपुरस्सरं विवरणं प्रायच्छन्। सङ्गणकप्रयोगशालायामपि छात्रान् नीत्वा सम्पादनकार्यस्य प्रायोगिकम् अनुभवं उत्पादयितुं प्रयत्नो विहितः।

विभागाध्यक्षाः डा. चन्द्रकान्तवर्याः वर्गस्य ज्येष्ठाः प्राध्यापकाः डा. रा.बालाजिवर्याः, संयोजकाः डा. हरिप्रसादवर्याः अन्ये प्राध्यापकाश्च कार्यशालायामस्यां उपातिष्ठन्त। दिनान्ते

व्याख्यातुं आगतवतीनां श्रीमती. शुभा डि. वर्याणां, एवं सूर्यहेब्बारमहोदयानां सम्माननकार्यक्रमेण सह पूर्वं सम्पादितानां व्यावसायिकक्षमतोन्नयनकार्यक्रमाणां प्रमाणपत्राणि छात्रेभ्यः वितीर्णानि।

**शोभायात्रा- वीथीनाटकङ्कञ्च**

शिक्षाशास्त्रिच्छात्राणां व्यावसायिकक्षमतोन्नयनकार्यक्रमस्य अङ्गत्वेन शोभायात्रा-वीथीनाटकञ्च एप्रैलमासस्य २२ दिनाङ्के मेणसेप्रदेशे सम्पत्यते।

****

# विषयानुक्रमणिका


| अ.क्र | लेखः | लेखकः | पुटसंख्या |
|---|---|---|---|
| | **संस्कृतधारा** | | |
| 1. | संस्कृतभाषाविकासे प्रतिबन्धकाः तेषां निवारणोपायाश्च | डा.रामचन्द्रुलबालाजी | 01 |
| 2. | पाठ्यक्रमनिर्माणसिद्धान्ताः | डा.हरिप्रसादः के. | 03 |
| 3. | शिक्षामनोविज्ञानस्य विधयः | डा.गणेश ति. पण्डित: | 08 |
| 4. | शान्तिशिक्षाया: प्रासङ्गिकता | डा. नारायण वैद्य | 12 |
| 5. | प्रतीच्याधिगमः | दुर्गाप्रसाद भट्टराई | 14 |
| 6. | बुद्धेः परिभाषा: सिद्धान्ताश्च | पुपुन दासः | 19 |
| 7. | आधुनिकशिक्षायाः उद्देश्यानि | अङ्कुश विश्वेश्वर हेगडे | 22 |
| 8. | विदुरनीतिः | शिबाजी साहु | 24 |
| 9. | भारतीयानां भाषाविज्ञाने योगदानम् | करिस्मा बेहेरा | 25 |
| 10. | प्राचीनभारते नारी | रञ्जुला पधान | 27 |
| 11. | शिक्षादर्शनयोर्मध्ये सम्बन्ध: | सङ्गीत सुना | 30 |
| 12. | सा विद्या या विमुक्तये | चिन्मय भट्ट: | 32 |
| 13. | ममहाविद्यालयः | रवीश जोशी | 35 |
| 14. | शरीरमाद्यं खलु धर्मसाधनम् | मधुस्मिता मिश्र | 37 |
| 15. | स्त्रीशिक्षायाः आवश्यकता | संजय सरकार | 38 |
| 16. | शिक्षासौरभम् | मंगतायारु गुम्मडि | 40 |
| 17. | शिक्षा एका आजीवनप्रक्रिया | बसन्त बाहाला | 41 |
| 18. | सुराष्ट्रनिर्माणे शिक्षकस्य भूमिका | अशोक डंगवाल | 43 |
| 19. | स्त्रीशिक्षा अनिवार्या | रामचन्द्र भट्टः | 45 |
| 20. | शिक्षायाः अर्थः परिभाषाच | शिवप्रसाद केशन् | 47 |
| 21. | फ्राएड महोदयस्य चिकित्सा | रोझी बञ्चोर् | 49 |
| 22. | शिक्षा एक: जीवनस्य आधारः | द्वितीकृष्ण पाणीग्राही | 50 |

| | | | |
|---|---|---|---|
| 23. | शिक्षामनोविज्ञानस्य आवश्यकता | उमाकान्त जोशी | 52 |
| 24. | शास्त्रस्य प्रयोजनम् | ममता पधान | 53 |
| 25. | शिक्षणव्यूहः | हीरामणि महान्त | 55 |
| 26. | आदर्शशिक्षकः | रजनीगन्धा साहू | 57 |
| 27. | उपयुक्तमूल्याङ्कनोपकरणानां निर्माणे शिक्षकस्य भूमिका | ज्योतिर्मयी परिडा | 58 |
| 28. | शिक्षणस्य शिक्षकस्य च महत्त्वम् | जयदेव बारिक | 60 |
| 29. | प्राचीनविज्ञानस्य प्रतिष्ठा | तोषकुमार साहू | 61 |
| 30. | शिक्षायाः महत्त्वम् | नीरज पंत: | 63 |
| 31. | सच्चिक्षा धर्मशिक्षा | राहुल मिश्रः | 65 |
| 32. | वैदिक काले शिक्षायाः व्यवस्था | सञ्जय कुमार साहु | 67 |
| 33. | ज्योतिश्शास्त्रम् | वेङ्कटेश अनन्त हेगडे | 69 |
| 34. | शैक्षिकविचारेषु कालिदासस्य सुमतिः | आदर्शः के.एस् | 74 |
| 35. | संस्कृताध्ययनं कथं कर्तव्यम् | विनयकुमार भाग्वत् | 76 |
| 36. | भारतीयसंविधाने स्त्रीणां शैक्षिकावसरः | यचिन्द्र कुमार बेहेरा | 78 |
| 37. | अधिगममूल्याकलनम् | प्रकाश लाक्रा | 80 |


## हिन्दीधारा


| | | | |
|---|---|---|---|
| 38. | शिक्षामनुष्य के जन्मगत अधिकार | देवानन्द राणा | 84 |
| 39. | छात्रजीवन में शिक्षक का महत्व | श्रीकान्त नायक | 85 |
| 40. | आखिर कैसी हो शिक्षा ? | कार्तिकमिश्रा | 86 |
| 41. | नाटक शिक्षण | विनय कुमार शुक्ल | 89 |
| 42. | शिक्षण सिद्धान्त | जयदेव साहु | 91 |
| 43. | उधम सिंह | नवदीप शर्मा | 93 |


## आङ्ग्लधारा


| | | | |
|---|---|---|---|
| 44. | Our Journey | Trupti Sahu | 97 |
| 45. | Can online learning substitute classroom learning? | T.k. Kaushik Rao | 98 |

| | | | |
|---|---|---|---|
| 46. | Autobiography of pen | Minsu Bagarti | 100 |
| 47. | Life | Sabita Mandal | 101 |
| 48. | Education | Susanta Suna | 102 |
| 49. | What is education | Subhasmita Sahoo | 103 |
| 50. | The real study | Durgashankar Panda | 104 |
| 51. | Yoga in our daily life | Agneya Bhat | 105 |


## कन्नडधारा


| | | | |
|---|---|---|---|
| 52. | ಭಾರತದಲ್ಲಿ ಶಿಕ್ಷಣ | ವಿನಾಯಕ ಸಭಾಹಿತ | 107 |
| 53. | ಶಾಲಾ ಶಿಕ್ಷಣ | ಗಣೇಶ ಅನಂತ ಭಟ್ಟ | 109 |
| 54. | ಶಿಕ್ಷಾಕ್ಷೇತ್ರದಲ್ಲಿ ಕಾಳಿದಾಸನ ಪಾತ್ರ | ಹನುಮಂತರಾಯ K.D | 111 |
| 55. | ಮನೋಜ್ಞಾನವಾಗಿ ಭಗವದ್ಗೀತೆ | ಶ್ರೀಪತಿ ಭಟ್ಟ | 114 |

संस्कृतधारा

# संस्कृतभाषाविकासे प्रतिबन्धकाः तेषां निवारणोपायाश्च

**डा.रामचन्द्रुलबालाजी**

सहाचार्यः,शिक्षाविभागः

भारतीयदर्शनस्य धर्मस्य संस्कृतेश्च प्रतीकरूपेण संस्कृतभाषायाः महत्त्वम् अनिर्वचनीयं वर्तते । विश्वस्य प्राचीनतमा भाषा भारतस्य अमूल्यनिधिश्च भवति । बह्वीनां भाषाणां जननी पोषिणी च भवति ।

प्राचीनैः ऋषिभिः मानवजीवनं सुखमयं विधातुं स्वीयानुभवैः तपश्शक्त्या च सम्पादितं बहुविधं विज्ञानं संस्कृतभाषायामेव निक्षिप्तमस्ति । मानवस्वास्थ्यनिर्माणाय, आयुषः वर्धनाय आयुर्वेदः, उत्तमवासपरिकल्पनाय वास्तुशास्त्रम्, भाविनि जायमानसङ्कटानां ज्ञानाय तत्परिहाराय च ज्योतिश्शास्त्रम्, उत्तमसंस्काराणां व्यवहारस्य च ज्ञानाय धर्मशास्त्रम् इत्यादयः संस्कृतभाषायां विराजन्ते । आधुनिकैरधीयमानानि बहूनि शास्त्राणि यथा – विमानशास्त्रम्, वनस्पतिशास्त्रम्, धातुशास्त्रम्, शल्यचिकित्सा, योगशास्त्रम् इत्यादीनि संस्कृते एव वर्तन्ते ।

साम्प्रतिककाले भाषायाः स्थितिं विचारयामश्चेत् पक्षद्वयं भवति । एकस्मिन् पक्षे प्रायः अष्टादशतः उपरि संस्कृतविश्वविद्यालयाः सहस्रशः अधीयानाः छात्राश्च वर्तन्ते । विदेशेष्वपि संस्कृतभाषायाः अध्ययनं कर्तुं बहवः प्रयतन्ते अध्ययनं कुर्वन्ति च । विभिन्नेषु शास्त्रेषु बहवः प्रकाण्डपण्डिताः दरीदृश्यन्ते।

अन्यस्मिन् पक्षे पश्यामश्चेत् सर्वत्रापि विद्यालयेषु पाठ्यांशेषु संस्कृतस्य स्थितिः शोचनीया वर्तते । पूर्वं शताङ्कानां विद्यमानस्य संस्कृतस्य विंशतेः अङ्कानां कृते परिवर्तनं

वैकल्पिकरूपेण स्थापनं च दृश्यते । छात्राणां संख्या अपि विद्यालयेषु हीयमाना वर्तते । तत्र संस्कृतभाषायाः ह्रासस्य कारणानां विवेचनमत्र किञ्चित् कुर्मः ।

विद्यालयेषु संस्कृतभाषायाः ह्रासस्य कारणानि

1. संस्कृताध्यापकानाम् उपेक्षाबुद्धिः ।
2. सहजबोधनपद्धतीनां स्वीकरणाभावः ।
3. छात्रानुगुणबोधनरीतेरभावः ।
4. साधनमेव साध्यत्वेन चिन्तनम् ।
5. पाठ्यपुस्तके आकर्षकजनोपयोगिविषयाणां स्थापनाभावः ।
6. अनावश्यकव्याकरणादि बोधनेन भीतेरुत्पादनम् ।
7. संस्कृतेऽन्तर्निहितजनोपयोगितत्त्वानां प्रचाराभावः ।
8. विषयेषु शास्त्रेषु च गभीराध्यनाभावः ।
9. संस्कृतायोगैरुक्तदिशा आचरणाभावः ।
10. विवधायोगानां कारणेन पाठ्यक्रमे संस्कृतस्य स्थानाभावः ।
11. पालकानाम् अनादरः ।
12. संस्कृतभाषाविषयकं सङ्कुचितचिन्तनम् ।
13. आवश्यकप्रोत्साहाभावः ।
14. अन्यभाषाभाषिणां स्वस्वभाषाविषयकदुरभिमानः ।
15. मौलिकमूल्यानां विषये चिन्तनाभावः ।

अतः संस्कृतभाषायाः विकासाय एवं कर्तव्यं भवति –

1. अध्यापकैः शास्त्रेषु गभीरज्ञानाय प्रयासः कर्तव्यः ।

2. विद्यालयातिरिक्तसमयेषु बोधनम्।
3. क्रियाशीलकपद्धतीनां प्रयोगः।
4. जनेषु संस्कृतभाषाविषयकजागृतेः सम्पादनम्।
5. छात्रानुगुणबोधनाय प्रयासः।
6. संस्कृतभाषायाः सार्वत्रिकत्वसम्पादनम्।

****

## पाठ्यक्रमनिर्माणसिद्धान्ताः

**डा.हरिप्रसादः के.**
वरिष्ठव्याख्याता, शिक्षाविभागः

पाठ्यक्रमस्य सिद्धान्तानां विषये चिन्तनावसरे पाठ्यक्रमो नाम विद्यालये प्रवर्तमानाः सर्वविधाः शैक्षिकक्रियाः शिक्षासहगामिक्रियाश्चेति मननीयम् । शैक्षिकक्रियासु पाठ्यचर्या प्राधान्यमावहति। तत्पाठ्यचर्यां निश्चितोद्देश्यप्राप्तिपर्यन्तं नेतुं पाठ्यपुस्तकादीनि उपकरणानि आवश्यकानि । अतः तेषां विषये अपि चिन्तनं विधेयम् । शिक्षासहगामिक्रियासु सर्वाङ्गिकविकासापेक्षितानां क्रियाकलापानां संयोजनविषये पाठ्यक्रमनिर्माणसिद्धान्ताः कथमुपयोगिनो भवन्तीति मननीयम्। कक्ष्याप्रकोष्टे बालकस्य ज्ञानात्मकपक्षस्य प्राधान्येन विकासार्थं अपेक्षितानां अंशानां विषये बलं दीयते। यद्यपि आध्यात्मिक-संवेगात्मक-चारित्रिक-नैतिकेत्यादीनां पक्षानां विकासः कक्ष्याप्रकोष्टे न जायते इति नास्ति तथापि तादृशः सर्वोऽपि विकासः पाठ्यक्रमाधारेण(Syllabus) पठ्यपुस्तकमाश्रित्यप्रवर्तते । स च विकासः ज्ञानात्मकप्रक्रियाश्रित एव । यतो हि कक्ष्याप्रकोष्टे पाठ्यपुस्तकान्याश्रित्य एव एतादृशविकाससम्पादनार्थं यत्नो विधीयते न तु क्रियात्मकपक्षमाश्रित्य । अतः छात्राः एतादृशविकाससम्पादनार्थम् अवश्यं पाठसहगामिक्रियासु भागं गृह्णीयुः । अतः

पाठ्यक्रमनिर्माणसिद्धान्ताः पाठ्यसहगामिक्रियादीनां माध्यमेन छात्रस्य सर्वाङ्गिकविकाससम्पादनाय अपेक्षितान् मौलिकान् अंशान् ज्ञापयन्तीत्यपि मननीयम् । इत्थं बालकस्य सर्वाङ्गिकविकाससम्पादनाय अपेक्षितपाठ्यक्रमनिर्माणवेलायां के सिद्धान्ताः अस्मान् उपकुर्वन्तीति अवलोकयामः -

1. बालकस्य रुचेः सिद्धान्तः(Principle of Childs Interest)
2. बालकस्य अवश्यकतायाः सिद्धान्तः(Principle of Childs Need)
3. सामाजिकावश्यकतायाः सिद्धान्तः(Principle of Social Need)
4. उपयोगितायाः सिद्धान्तः(Principle of Utility)
5. सर्जनात्मकतायाः सिद्धान्तः(Principle of Creativity)
6. कार्य-क्रीडयोः संश्लेषणात्मकसिद्धान्तः(Principle of Synthesis between Work and Play)
7. व्यावहारिकादर्शानां प्राप्तेः सिद्धान्तः(Principle of Realization of Ideals of Behaviour )

एकैशः एतेषां विषये सम्प्रति परिशीलनं कुर्मः।

1. **बालकस्य रुचेः सिद्धान्तः**(Principle of Childs Interest)

पूर्वं पाठ्यचर्या रुच्यनुसारं नासीत् । रुच्यनुसारं पाठ्यचर्या न भवति चेत् तत् अधिगन्तुं बालकस्य प्रवृत्तिः न भवति । अत एव बालकस्य रुच्यनुसारं पाठ्यक्रमः/पाठ्यचर्या भवेदिति एतस्य सिद्धान्तस्य सारः भवति । यस्मिन् विषये येषु क्रियाकलापेषु वा बालकस्य रुचिः भवति तादृशविषयाः पाठ्यचर्यायां भवन्ति चेत् बालकः आनन्देन अधिकोत्साहेन अधिकावधानेन अधिकसक्रियः सन् भागं ग्रहीतुं शक्नोति । तत्परिणामतः तस्य फलमपि

समीचीनं भवति । इत्युक्ते बालकस्य समीचीनमात्रया विकासो जायते । एतद्विपरीततया अरुचिकराः क्रियाकलापा पाठ्यविषयाश्च भवन्ति चेत् तत्तत्क्रियाकलापेषु सोत्साहं सानन्दं सक्रियतया सावधानञ्च बालकस्य भागग्रहणं न सम्भवति । अत एव बालकस्य रुचिमाश्रित्य पाठ्यचर्या भवेदिति अयं सिद्धान्तः प्रतिपादयति । बालकानाम् अध्येयविषयेषु रुचिः भवत्येव इति तु नास्ति । बालास्तावत् क्रीडासक्ताः । सर्वेऽपि विषयाः क्रीडाविधिमाध्यमेन बोधयितुमपि न शक्यन्ते । तथापि बालकस्य वयोनुगुणं स्तरानुगुणं च रुचिः कीदृशविषयेषु भवतीति सुविचिन्त्य तादृशविषयाः पाठ्यचर्यायां विनिवेशनीयाः, विकल्पाः वा दातव्याः इति सिद्धान्तस्यास्य आशयो वर्तते ।

2. **बालकस्य अवश्यकतायाः सिद्धान्तः**(Principle of Childs Need)

बालानां आवश्यकतानुसारं पाठ्यचर्यायां क्रियाकलापाः भवन्ति चेत् बालकस्य समुचितविकासो जायते । बालकस्य स्तरानुसारं समाजस्य(राष्ट्रस्य/राज्यस्य) परिस्थित्यनुसारं च बालकस्य विकासोपयोगिनः विभिन्नाः क्रियाकलापाः भवितुमर्हन्ति । मानवः असीमसामर्थ्यस्य खनिः भवतीति स्वामी विवेकानन्दः कथयति । किन्तु एतस्य असीमसामर्थ्यस्य प्रकाशनार्थं अपेक्षितवातावरणस्य निर्माणं पाठ्यचर्यया कर्तव्यम् । तदानीमेव तस्य सामर्थ्यस्य प्रकाशनं विकासश्च जायते । बालकस्य वैय्यक्तिकाः आवश्यकताः शिक्षामाध्यमेन साक्षात् झटिति पूर्यन्ते इति यद्यपि वक्तुं न शक्यते तथापि बालकस्य वैय्यक्तिकावश्यकतानां पूर्त्यर्थं सः यथा सक्षमः भवेत् तादृशक्रियाकलापयुक्ता पाठ्यचर्या भवेत् इति सिद्धान्तस्यास्य आशयः ।

3. सामाजिकावश्यकतायाः सिद्धान्तः(Principle of Social Need)

पाठ्यक्रमस्य निर्माणवेलायां सामाजिकावश्यकतायाः विषये अवधानं दातव्यम् । इत्युक्ते समाजः शिक्षितात् जनात् किमपेक्षते इत्याधारीकृत्य पाठ्यक्रमः निर्मातव्यः इति ।

शिक्षितः जनः समाजस्य दोषाणां निर्मूलनार्थं सक्षमः भवेत् । समाजस्य दोषाणां निन्दकः न भवेत् । सामाजिक-असमानतायाः दुष्परिणामस्य निवारणोपायान् चिन्तयितुं योग्यः शिक्षकः यथा सम्पद्येत तादृशः पाठ्यक्रमः निर्मितः भवेत् । बालकेन समाजस्य सर्वैः सदस्यैः सह सौहार्देन जीवता, सर्वस्यापि आत्मगौरवं सम्मानयता वर्तितुं अपेक्षितां शिक्षां प्राप्तुं योग्यः पाठ्यक्रमः भवेत् ।

"शुनि चैव श्वपाके च पण्डिताः समदर्शिनः"

इतिवत् बालकः सामाजिकसमानताप्रतिपादकः सम्पद्येत । इत्थं उच्चस्तरस्य आदर्शपूर्णस्य जीवनस्य यापनेन उन्नतचिन्तनादिना च श्रेयोमार्गगामी समाजः पुरुषार्थान् सर्वान् साधयितुं यथा प्रवृत्तः स्यात् तादृशः पाठ्यक्रमः भवेदिति अस्य सिद्धान्तस्य सारः ।

4. उपयोगितायाः सिद्धान्तः(Principle of Utility)

यत्किमपि जनस्य, समाजस्य, राष्ट्रस्य वा उपयोगाय भवति तत् पाठ्यक्रमे स्थानं प्राप्नुयात् । निर्मिता पाठ्यचर्या उपयुक्ता भवेत् । यच्च अनुपयुक्तम् अस्ति तत् कियद्वा महत्वपूर्णं स्यात्, पाठ्यक्रमे तु स्थानं कथमपि न प्राप्नुयात् । किन्तु किमुपयुक्तं किमनुपयुक्तं इति निश्चयः सुकरः नास्ति । अपि च सर्वस्यापि पाठ्यक्रमस्य उपयोगः कः इति पाठ्यक्रमस्य क्रियान्वयनानुक्षणं न ज्ञायते । पाठ्यक्रमस्थानां केषाञ्चित् विषयाणाम् अत्यन्तं दूरगामिपरिणामाः भवन्ति ये च झटिति न ज्ञायन्ते न प्राप्यन्ते च । अतः पाठ्यक्रमात् प्राप्यमाणाः उपयोगाः के इति महता परिश्रमेण निश्चित्य तदनुसारं पाठ्यक्रमः निर्मातव्यः ।

5. सर्जनात्मकतायाः सिद्धान्तः(Principle of Creativity)

प्रत्येकस्मिन्नपि बालके या कापि सर्जनात्मकशक्तिः भवति । तस्याः अभिज्ञानं सुकरं तु नास्ति । तथापि बहुविधानां क्रियाकलापानां आयोजनेन बालकस्य कस्मिन् कर्मणि

सर्जनात्मकता वर्तते इति ज्ञातुं शक्यते । किन्तु बहूनां बालकानां आयोजितक्रियाकलापेषु कस्मिन्नपि कर्मणि सर्जनात्मकता न दृश्येत कदाचित् । एतस्य अभिप्रायः अयं नास्ति यत् तेषु बालकेषु सर्जनात्मकता एव नास्ति इति । वस्तुतः तेषु बालकेषु तादृशी काचित् सर्जनात्मकशक्तिः भवितुमर्हति यस्याः अभिज्ञानार्थं वा विकासार्थं वा कापि व्यवस्था विद्यालये न स्यात् । तत्तत्सर्जनात्मकशक्तिः तत्तद्बालकस्य विकासस्य वेगं अत्यधिकमात्रया वर्धयति । अतः बालकस्य सर्जनात्मकशक्तेः अभिज्ञानाय पश्चात् तद्विकासाय च विद्यालयीयपाठ्यचर्यायां समुचिता व्यवस्था भवेत् । इत्युक्ते पाठ्यचर्यायाम् तादृशाः क्रियाकलापाः भवेयुः येषां माध्यमेन बालकानां सर्जनात्मकशक्तेः अभिज्ञानेन सह तद्विकासार्थं समुचितोपक्रमाः भवितुमर्हन्ति ।

6. कार्य-क्रीडयोः संश्लेषणात्मकसिद्धान्तः(Principle of Synthesis between Work and Play)

क्रीडायाः उद्देश्यं तात्कालिकानन्दः भवति । एवमेव कस्यचित् क्रियाकलापस्य उद्देश्यं सुदूरस्थलक्ष्यस्य प्रयोजनस्य वा प्राप्तिर्भवति । किन्तु क्रीडायां यः आनन्दः भवति तस्य प्राप्तिपुरस्सरं कार्यमपि यथा साधयितुं शक्येत तथा क्रीडाकार्ययोः समन्वयः साधनीयः। इत्युक्ते क्रीडामाध्यमेन अध्ययनकार्यं कृत्वा अध्येयविषयस्य अनुभूतिः प्राप्तव्या इति । क्रीडायां कठिनतायाः अथवा पराजयस्य अनुभूतिः मानवं ततः न विमुखीकरोति । प्रत्युत इतोऽपि परिश्रमेण विजयप्राप्तेः दिशि मानवं प्रवर्तयति । अतः क्रीडायाः माध्यमः अध्येयविषयस्य अध्ययनकाठिन्यं गौणीकृत्य लक्ष्यसिद्धिञ्च प्रधानीकृत्य बालकम् अध्ययनकर्मणि प्रवर्तयति । अतः क्रीडया सह कार्यस्य (अध्ययनस्य) संश्लेषणम् आनन्दावाप्तिपुरस्सरं लक्ष्यसिद्धये कल्पते । सारल्येन वक्तव्यं चेत् – क्रीडामाध्यमेन अध्यापनं कुर्मः चेत् बालकः आनन्देन पाठ्यविषयम् अवगच्छति । तस्य अध्येयविषये जामिता न भवति । असफलः भवति चेदपि अध्ययनं न परित्यजति च ।

7. व्यावहारिकादर्शानां प्राप्तेः सिद्धान्तः(Principle of Realization of Ideals of Behaviour)

“शीलं सर्वत्र भूषणम्” “वृत्तं यत्नेन संरक्षेत्” इत्येतादृशानि सुभाषितानि चारित्र्यस्य महत्वं प्रतिपादयन्ति । मानवस्य चारित्र्यं शुद्धं भवेत् । शिक्षया एव मानवस्य चारित्र्यं महोन्नतं भवति । पाठ्यचर्यायां उन्नतचारित्र्यवतां परिचयप्रदानाय व्यवस्था भवेत् इति अस्य सिद्धान्तस्य तात्पर्यम् । पाठ्यक्रमे महापुरुषाणां विषये पाठाः भवेयुः । अथवा लोकोत्तरचारित्र्यवतां स्मारकाणां सन्दर्शनार्थं यात्रा भवेत् । अथवा तादृशाणां महापुरुषाणां विषये चर्चा, प्रायोजनाकार्यम्(Project Work), निबन्धलेखनप्रतियोगिता इत्यादयः क्रियाकलापाः भवेयुः । एतादृशैः क्रियाकलापैः अस्य सिद्धान्तस्य प्राप्तिः भवति ।

****

सन्दर्भग्रन्थाः –

1. आर.पी .पाठक “पाठ्यचर्या निर्देशन एवं तुलनात्मक शिक्षा का आधार”।
2. भास्करमिश्र “शिक्षा संस्कृति नये सन्दर्भ में” ।
3. सियारामयादव “पाठ्यक्रम विकास”, ।
4. रामपालवर्मा रमेशशर्मा च; “पाठ्यक्रम शिक्षण कला एवं मूल्यांकन”।

****

## शिक्षामनोविज्ञानस्य विधयः

डा.गणेश ति. पण्डित:

सहायकप्राध्यापक:, शिक्षाविभाग:

शिक्षामनोविज्ञानं मनोविज्ञानस्य एका शाखा वर्तते । शिक्षकः शिक्षामनोविज्ञानी स्यात् इति उच्यते । शिक्षामनोविज्ञानस्य अध्ययनेन बालानां व्यक्तिगतभिन्नताम् अभिरुचिं

योग्यतामपि ज्ञातुं शक्नुमः । बालव्यवहारसम्बद्धानां विविधानां समस्यानाम् अध्ययनार्थमपि शिक्षामनोविज्ञानम् उपकारं करोति । एतदर्थं शिक्षामनोविज्ञानिभिः केचन शिक्षणविधयः उपकल्पिताः सन्ति । ते च यथा –

१. अन्तर्निरीक्षणविधिः (Introspection Method)
२. बाह्यनिरीक्षणविधिः (Extrospection Method)
३. प्रयोगात्मकविधिः (Experimental Method)
४. नैदानिकविधिः (Clinical Method)
५. साक्षात्कारविधिः (Interview Method)
६. प्रश्नावलीविधिः (Questionnaire Method)

एवं बहवः विधयः सन्ति । क्रमशः यथा –

1. अन्तर्निरीक्षणविधिः(Introspection Method) – अस्य विधेः आत्मनिरीक्षणविधिः इत्यपि नामान्तरम् अस्ति । संरचनावादिनः अस्य विधेः समर्थकाः सन्ति । वुण्ट् (Wundt)टिचनर् (Titchner) स्टौट् (Stout) प्रभृतयः मानवस्य चेतनानुभूतेः अर्थात् स्वानुभवस्य (Conscious Experience) अध्ययनार्थम् एषः विधिः उत्तमः इति अवोचन् । अस्य विधेः साहाय्येन बालानां प्रौढानां च मानसिकदशायाः (Mental Status) अध्ययनं कर्तुं शक्नुमः । एनं विधिं छात्राध्यापकौ उभावपि यदा कदापि प्रयोक्तुं शक्नुतः ।
2. बाह्यनिरीक्षणविधिः (Extrospection Method)– एषः विधिः व्यवहारवादिभिः प्रवर्तितः अस्ति । अन्तर्निरीक्षणविधौ वस्तुनिष्ठता नास्तीति व्यवहारवादिनां मतम् । अतः एव एषः विधिः वस्तुनिष्ठनिरीक्षणविधिः इत्यपि उच्यते । अत्र कस्यचित् बालकस्य अथवा व्यक्तेः बाह्यव्यवहाराणां क्रमबद्धरूपेण (वस्तुनिष्ठरूपेण) निरीक्षणं कृत्वा अध्ययनं क्रियते । बालाव्यवहाराणां चेष्टायाश्च निरीक्षणेन तेषाम्

योग्यताभिरुचिरित्यादीनां विषये स्पष्टं ज्ञानं प्राप्तुं शक्नुमः । परन्तु केवलं बाह्यव्यवहाराणाम् अध्ययनेन छात्राणां विषये परिपूर्णं ज्ञानं नैव लभ्यते इति केचन आक्षेपं कुर्वन्ति । बालकानां विभिन्नसमस्यानाम् परीक्षणाय तेषाम् व्यक्तिवृत्तस्य (इतिहासस्य) अध्ययनमपि सर्वादौ अत्र क्रियते । अतः अयं विधिः व्यक्तिवृत्ताध्ययनविधिः (Case History Method) इत्यपि उच्यते । परन्तु केचन उपचारात्मकविधित्वेन (Remedial) नैदानिकविधिं स्वीकुर्वन्ति । पुनः व्यक्तिविशेषस्य विशिष्टप्रतिभाशालिनां बालानां संस्थानाञ्च अध्ययनार्थं व्यक्तिवृत्ताध्ययनविधिम् उपयुञ्जते । परन्तु द्वयोः विध्योः मध्ये साम्यम् अस्त्येव ।

3. प्रयोगात्मकविधिः(Experimental Method)– शिक्षामनोविज्ञानस्य विधिषु सर्वोत्कृष्टः विधिः नाम प्रयोगात्मकविधिरेव । अस्मिन् विधौ प्रयोगकर्ता (प्रयोजकः) छात्रस्य (प्रयोज्यस्य) व्यवहारणाम् अध्ययनं नियन्त्रितपरिस्थितौ (Controlled Situation) करोति । अस्मिन् विधौ स्वतन्त्रचरस्य (Independent Variable) प्रभावः आश्रितचरस्य (Dependent Variable) उपरि कथं भवतीति प्रयोगपुरस्सरं परीक्ष्यते । स्वतन्त्रचरस्य सञ्चालनेन आश्रितचरस्य उपरि जायमानस्य परिणामस्य अध्ययनेन निर्दिष्टव्यवहारस्य अथवा क्रियायाः निर्दिष्टं कारणं किमिति विज्ञातुं शक्यते । कार्यकारणसम्बन्धपरीक्षणमेव प्रयोगविधेः प्रमुखं लक्ष्यं वर्तते । एतादृशविधेः प्रयोगेण अध्ययने आन्तरिकवैधता (Internal Validity) समायाति ।
4. नैदानिकविधिः(Clinical Method) – शिक्षामनोविज्ञानस्य विशिष्टः विधिः एषः । कुसमायोजितबालकानां (Maladjusted Children) विचलितबालानां (Deviant Children) समस्यानाम् अध्ययनार्थम् अयं विधिः उपयुज्यते । बालकानां संवेगात्मकसमस्यानां (Emotional Problems) अध्यननार्थमपि विधिरयम् उपयुक्तकरः वर्तते ।

5. साक्षात्कारविधिः(Interview Method)– अस्य विधेः प्रयोगावसरे शिक्षकः अथवा अनुसन्धाता छात्रस्य पुरतः उपविशति । बालकस्य एकस्य अथवा बालानां लघुसमूहस्य अध्ययनार्थम् एषः विधिः उपयुक्तकरः वर्तते । अनेन विधिना बालानां अभिरूचीनाम्, योग्यतानाम् मनोवृत्तीनाञ्च साक्षात् अध्ययनं कर्तुं शक्यते । साक्षात्कारः संरचितसाक्षात्कारः (Structured Interview) असंरचितसाक्षात्कारः इति विभक्तुं शक्यः । प्रथमे प्रकारके यः साक्षात्कारं स्वीकरोति सः पूर्वमेव के के प्रश्नाः पृष्टव्याः इति निर्धारयति । एतादृशे साक्षात्कारे वस्तुनिष्ठता अधिकादृश्यते । द्वितीये प्रकारके साक्षात्कर्ता पूर्वमेव मनसि चिन्तितान् प्रश्नान् प्रयोज्यस्य बालस्य पुरतः उपस्थापयति । परन्तु अत्र निर्दिष्टः क्रमः न भवति ।

6. प्रश्नावलीविधिः(Questionnaire Method) – प्रश्नावलीविधिः मनोविज्ञानस्य प्रसिद्धः विधिः विद्यते । अस्मिन् विधौ प्रश्नानाम् एका दीर्घसूची निर्मीयते । एवं निर्मिता प्रश्नावली बालेभ्यः दीयते । बालाः प्रश्नावल्यां विद्यमानान् प्रश्नान् पठित्वा ‘आम्’ अथवा ‘न’ इति प्रतिक्रियां यच्छन्ति । बालकानाम् अभिरूचेः आवश्यकतायाः व्यसनानां च परीक्षणे प्रश्नावलीविधिः नितराम् उपकरोति । प्रश्नावल्याः एकस्मिन् प्रकारके प्रश्नानाम् उत्तरलेखनाय (वाक्यद्वये त्रये वा) स्थानं दीयते । छात्राः प्रश्नान् पठित्वा उत्तराणि अत्र लिखन्ति । एतादृशी प्रश्नावली मुक्तप्रश्नावली (Open-form Questionnaire) इत्युच्यते । द्वितीयप्रकारके उत्तराणि अङ्कनीयानि भवन्ति । एतादृश्यां प्रश्नावल्यां ‘आम्’ ‘न्’ ‘सत्यम्’ ‘असत्यम्’ इत्यादयः विकल्पाः पूर्वमेव मुद्रिताः भवन्ति । एतादृशी प्रश्नावली बन्धरूपप्रश्नावली (Closed form Questionnaire) इत्युच्यते ।

एतान् विधीन् विहाय अन्येऽपि विधयः मनोविज्ञाने वर्तन्ते एव । यथा- मनोदैहिकविधिः (Psychophysical Method) सहसम्बन्धात्मकविधिः (Correlational Method) निर्धारणविधिः (Rating Method) श्रेणीविधिः (Ranking Method) इत्यादयः विधयः

प्रसिद्धाः सन्ति । अनुसन्धातारः समस्यानुसारं प्रसङ्गानुसारम् एतेषां प्रयोगं कुर्वन्ति । मनोवैज्ञानिकविधीनां सर्वेषामपि गुणदोषाः सन्ति । अतः एतेषां ज्ञानाभावे प्रयोगं कर्तुं न शक्नुमः ।

****

# शान्तिशिक्षाया: प्रासङ्गिकता

**डा.नारायण वैद्य**

अतिथिप्राध्यापक:,शिक्षाविभाग:

शान्तिशिक्षाया: महत्त्वं प्रासङ्गिकता इत्यनयो: अस्ति भेद: । महत्त्वं त्रिषु कालेषु अनुभूयते । प्रासङ्गिकता कालानुसारं परिस्थितेरनुगुणं अनुभूयते । अधुना एकविंशतिशताब्दौ मानसिकरूपेण अशान्ति: लोके दृश्यते । अत: पार्थक्येन शान्तिशिक्षाया: प्रसङ्गिकता अधुना अनुभूयते । प्रासङ्गिकताया: मुख्यांशा: स्विवरणं निरूप्यन्ते ।

**वैश्विकाशान्ते: निवारणम्**

अशान्ति: न केवलम् एकस्मिन् राष्ट्रे अपि तु सम्पूर्णविश्वे प्रसृतं विद्यते ।विंशतितमशताब्दौ द्विवारं विश्वयुद्धं जातम् । एवं युद्धेन वैश्विकाशान्ति: जायते । विश्वस्तरे अशान्ते: मुख्यं कारणं भयोत्पादनं मानवीयसम्बन्धानाम् अनादर: इति वक्तुं शक्यते । पुरा आसीत् विश्वम् एकं नीडम् इति भावना । अधुना एषा मानसिकी भावना नास्ति । अत: न वा राष्ट्रम्, न वा व्यक्ति: शान्तिमनुभवति । विश्वस्तरे शान्ते: पुन: प्रतिष्ठापनाय प्रत्येकं जनस्य सहयोग: अपेक्षते । अत: “शान्ति: प्रत्येकं जनादारभ्य विश्वं प्रति” इति नियममाश्रित्य प्रयत्न: विधेय: । अहं भावं परित्यज्य वयम् इति भावना विकसनिया । विद्यालये विविधविषयाणां पाठ्यक्रमस्य बोधनेन केवलं भौतिकज्ञानस्तरस्य विकास: जायते न तु नैतिकताया: न वा अध्यात्मिकभवनाया: अथवा परम्पराया: । अत: अधुना शान्तिशिक्षाया: प्रासङ्गिकता अस्ति ।

**भ्रष्टाचारस्य निर्मूलनम्**

सार्वजनिकक्षेत्रे स्वीकृतमूल्यानां विरुद्धम् आचरणम् एव भ्रष्टाचार: इति व्यपदेश: । भ्रष्टाचार: समाजस्य एकप्रकारक: रोग: अस्ति । विविधक्षेत्रेषु भ्रष्टाचार: प्रवर्तते । यथा – राजनीति:, न्यायव्यवस्था, सार्वजनिकक्षेत्रम् इत्यादिषु भ्रष्टाचार: प्राचुर्येण प्रचलति । अत्र भ्रष्टाचारस्य कारणं सन्तृप्ते: अभाव: । विप्र: भवेत्पण्डित:, राजा भवेद्धार्मिक:, निर्धनोऽपि पुरुष: पापं न कुर्यात्, न्यायाधिकारी न्यायनीतिनिपुण: धर्मज्ञ: भवेत् इति मानवीयसाधारणगुणा: सम्प्रतं न सन्ति । अत: भ्रष्टाचार: सर्वत्र प्रवर्तते । तस्मत् भ्रष्टाचारनिर्मूलनाय सदाचारानुष्टानाय शान्तिशिक्षा एव क्षमते । शिक्षकप्रशिक्षणे शान्तिशिक्षाया: बोधनम् आदौ अध्यापका: शान्ते: महत्त्वम्, आवश्यकता इत्यादिविषये जानीयु: । यदि अध्यापक: शान्तिं प्रति रुचिं न स्थापयति तर्हि हिंसया: दुष्प्रचारं करोति । प्रसिद्धमिदं वाक्यम् “यदहं जानामि तदेव पाठयामि, यथा अहमस्मि तथैव भवितव्यमिति अधिगमयामि” इति । अत: शिक्षकप्रशिक्षणे शान्तिशिक्षाया: बोधनम् आवश्यकम् । यत: अध्यापकस्य वर्तनं शोधितं स्यत् ।

किशोरावस्थायां तन्यताया: निवारणम् किशोरावस्था अतीव क्लिष्टा भवति । किशोरावस्थायां मानसिकसङ्घर्ष: अधिक: भवति । लघु विषयाणामपि उद्वेग: जायते । अस्यां अवस्थायां जागरूकेण अध्यापकेन छात्राणां तन्यता वरणीया । अत: किशोरावस्थायां तन्यताया: निवारणप्रबन्धनाय शान्तिशिक्षाया: प्रासङ्गिकता अस्ति ।

एवं शान्तिशिक्षा शिक्षकेभ्य:, प्रशिक्षणार्थिभ्य:, छात्रेभ्य:, नेतृभ्य: च शान्तिशिक्षाया: प्रासङ्गिकता अस्ति। शान्तिशिक्षया तन्यतानिवारणं, आध्यात्मिकभावनाया: विकसनम्, सदाचारप्रवृत्ति: च सम्भवति ।

****

# प्रतीच्याधिगमः

**दुर्गाप्रसाद भट्टराई**

अनुक्रमाङ्कः 80 -1

शिक्षाशास्त्रीप्रथमवर्षम्

शिक्षामनोविज्ञानान्तर्गताधिगमेत्यस्य महत् स्थानं विद्यते। यतः मनुष्यः जन्मनः परम् आमरणं किमपि जानन्नेव भवति । एवं शिक्षामनोविज्ञानस्याधिगमः हृदयमित्युच्यते।

एवं वयं जानीम एव यत् सर्वादौ मनोविज्ञानस्यार्थः विद्वद्भिः भिन्न-भिन्नरूपेण स्वीकृतः, जे.बी.वाँटसन इत्याख्येन विदुषा उक्तं यत्व्यवहारस्य विज्ञानमेव मनोविज्ञानमिति,परन्तु व्यवहारेति पदं 1905 मध्ये सर्वादौ 'विलियम मैक्ड्यूगल' इत्याख्येन विदुषा स्वीये ग्रन्थे (out line of psychology) विधाय उक्तं यत्-"व्यक्तेः तादृशी क्रिया या च क्रिया बाह्यरूपेणावलोक्यते स एव व्यवहारः"इति।

ततश्च जे.बी.वाँटसन महोदयः व्यवहारस्य विज्ञानमित्येकः विचारः आनीतवान् यश्च विचारः सन् 1913 मध्ये व्यवहारवादः इति कथितः ख्यातश्च।

तत्र च पुनः उक्तं व्यवहारस्य परिवर्तनाय कारणत्रयं (अभ्यासः,प्रशिक्षणम्,अनुभवः) भवति,यच्च परिवर्तनं स्थायी स्यात्। अनेन स्पष्टः भवति यत् अधिगमः इत्युक्ते"व्यक्तेः व्यवहारे अभ्यासप्रशिक्षणानुभवैः स्थायिरूपेणागतं परिवर्तनमेवेति ।

एवं बहुभिः पाश्चात्यविद्वद्भिः स्वमतैः अधिगमस्य परिभाषाः उक्ताः वर्तन्ते, याश्च-तत्रादौ-

१.क्रो एण्ड क्रो- स्वभावस्य, अभिवृत्तेः, ज्ञानस्य च अर्जनमेवाधिगमः इति ।

२.गिल्फाँर्ड-१-विकासस्यैका प्रक्रिया एवाधिगमः ।

२-नूतनज्ञानमेव नूतनप्रतिक्रियानामर्जनमेवाधिगश्चेति।

३.वि.एफ्.स्किनर्-व्यवहारे उत्तरोत्तरानुकूलनस्यैका प्रक्रिया एवाधिगमः।

४.आई जेंक- नूतनस्थायिपरिवर्तनस्यान्तर्गतं ज्ञातव्यस्य प्रक्रिया एवाधिगमः।

५.गेट्स- प्रशिक्षणानुभवयोः कारणेन व्यवहारे आगतं परिवर्तनमेवाधिगमः इति । एवं प्रकारेणाधिगमस्य परिभाषाः बहुभिः पाश्चात्यैः कथिताः वर्तन्ते।

**अधिगमपक्षाः**

मुख्याः त्रयः पक्षाः वर्तन्ते- * संज्ञानात्मकपक्षः,क्रियात्मकपक्षः,भावात्मकपक्षः च इति।

तत्रादौ-

**संज्ञानात्मकपक्षः**

अस्यापरनाम "ज्ञानात्मकपक्षः । यदि ज्ञानात् वयमधिगमं कुर्मः तर्हि तेन प्राप्तस्याधिगमस्यैव पक्षः संज्ञानात्मकेति।

**क्रियात्मकपक्षः**

कस्याश्चित् क्रियायाः वयं यद्यधिगमं कुर्मः सैव पक्षः क्रियात्मकपक्षः।

**भावात्मकपक्षः**

यदा वयं कस्यचिदपरस्य भावनयाधिगमं कुर्मः सैव पक्षः भावात्मकपक्षः।

**अधिगमप्रकाराः**

अधिगमस्य त्रयः प्रकाराः वर्तन्ते। यथा -

- शारीरिकाधिगमः
- प्रतिबोधनात्मकाधिगमः
- संङ्कल्पनात्मकाधिगमः

**शारीरिकाधिगमः**

व्यक्तिः यदा किमपि ज्ञातुं स्वशरीरद्वारा विभिन्नक्रियाः करोति सा एव क्रिया शारीरिकाधिगमः।प्रकारोऽयम् अनुकरणविधिना जायते, पुनश्चायं प्रकारः शैशवावस्थायामाधिक्येन भवति, शिशूनां बुद्धेः मनसश्च विकासाभावात्।

**प्रतिबोधनात्मकाधिगमः**

व्यक्तिः यदा यस्य कस्यापि विषयस्य ज्ञानार्थं कस्यचिदेकस्य तद्गतवस्तुनः परिकल्पनां बिम्बं वा स्व मस्तिष्के धारयति सैव प्रतिबोधनात्मकाधिगमः । प्रकारोऽयं विस्मरणविधिना जायते, एवमयं प्रकारः बाल्यावस्थायामाधिक्येन भवति, यथा- गजः उक्ते सति गजस्य मनसि बिम्बमेकं निर्माति तद्वत्।

**संङ्कल्पनात्मकाधिगमः**

बालकः यदा बहुविधानि वस्तूनि दृष्ट्वा तेषां वस्तूनामुपरि स्वचिन्तनं कल्पनां वा प्रारभते स एव कालः समयो वा संकल्पनात्मकाधिगमः । अयञ्चाधिगमः कौमारावस्थायामाधिक्येन जायते।

**अधिगमविशेषता**

१. अधिगमः एका प्रक्रिया भवति

२. अधिगमः सदैव उद्येश्यपूर्णः भवति

३. अधिगमः आजीवनं सततं गम्यमाना प्रक्रिया वर्तते

४. अधिगमः एका क्रियात्मिका प्रक्रिया विद्यते

५. अधिगमः सकारात्मकम् एवं नकारात्मकं च भवति

६. अधिगमे बहुप्रकाराणां विधयः सम्मिलिताः भवितुमर्हन्ति

७. अधिगमः एका स्वाभाविकी प्रक्रिया नास्ति

८. अधिगमे अध्यापकस्य, मण्डलेः, परिवारस्य च महत्वपूर्णा भूमिका भवति

९. अधिगमः सदैव नूतनः नैव भवति

१०. अधिगमेनैव सर्वाङ्गीणविकासः सम्भवति

अनेन प्रकारेण काश्चन अधिगमविशेषताः वर्तन्ते।

**अधिगमकारकाणि**

१.अभिप्रेरणम् २.विषयवस्तु ३.वातावरणम् ४.पूर्वज्ञानम् ५.विधयः ६.मनः ७.अनुक्रिया-आदि इत्येवं प्रकारेण अधिगमकारकाणि भवन्ति।

**अधिगमसिद्धान्ताः**

अधिगमसिद्धान्तः मुख्यतः द्विधा वर्तते-

१.व्यवहारवादसिद्धान्तः २.संज्ञानवादसिद्धान्तः

तत्र व्यवहारवादसिद्धान्ते केचन मुख्याः वर्तन्ते ये च-

| | | |
|---|---|---|
| ई.पी.पाँवलाव | - | शास्त्रीयमथवा परम्परागतानुबन्धनसिद्धान्तः |
| बी.एफ.स्किनर् | - | क्रियाप्रसूतानुबन्धनसिद्धान्तः |
| थाईनाई | - | प्रयास एवं विस्मृतसिद्धान्तः |
| सी.एल्.हल्ल् | - | पुनर्वलनसिद्धान्तः |

एवं प्रकारेण मुख्याः व्यवहारवादसिद्धान्तिनः वर्तन्ते।अनेनैव प्रकारेण संज्ञानवादसिद्धान्ते अपि केचन मुख्याः वर्तन्ते ये च- मैक्सवर्डीमर्,कोहलर् , लेविन, कोफ्पा इति ।

अनेन प्रकारेण संज्ञानवादसिद्धान्तिनः वर्तन्ते। व्यवहारवादिनः पुनर्बलनस्य, उद्दीपकस्य,अभिप्रेरणायाः कृते अधिकं बलं यच्छन्ति ।व्यवहारवादिनः संवेदनायाः, बुद्धेः, प्रत्यक्षीकरणस्य, संज्ञानस्य, समस्यायाः, च उपरि अधिकं बलं यच्छन्ति।पुनश्च व्यवहारवादिनः कथयन्ति यत्–

१.अधिगमःयन्त्रवत् भवतीति

२. अधिगमः मानवाः पशवश्च कर्तुं शक्नुवन्तीति

३. अधिगमः शनैः शनैः भवतीति

४.अधिगमः अनुबन्धेनैव भवतीति

एवमेव व्यवहारवादिनः तद्भिन्नमेव कथयन्ति यथा-

१. अधिगमः यन्त्रवत् नैव भवतीति

२. अधिगमः मानवाः एव कर्तुं शक्नुवन्तीति

३. अधिगमः अकस्मादेव भवतीति

४. अधिगमः समस्यासमाधानयोग्यतास्थापनमेवेति

इत्थं प्रकारेण प्रतीच्याधिगमः वर्तते ।

****

# बुद्धेः परिभाषाः सिद्धान्ताश्च

**पुपुन दासः**
अनुक्रमाङ्कः 806 -
शिक्षाशास्त्रीप्रथमवर्षम्

शिक्षामनोविज्ञाने बुद्धिविषये अधिकतया चर्चा विहिता । सप्तदशशतकाद् एव दर्शनैः सह मनोविज्ञानस्य अध्ययनेन बुद्धेः स्वरूपस्य ,संरचनायाः, प्रकाराणां, सैद्धान्तिक-आधारस्य चर्चा आरब्धा । मनोविज्ञानकैः बुद्धेः परिभाषा वर्गत्रये विभक्ता –

1- समायोजनम्
2- अधिगमसामर्थ्यम्
3- अमूर्तचिन्तनञ्च

वैयक्तिकविभिन्नतायाः आधारेण प्रत्येकस्मिन् मानवे बुद्धेः स्तरः आनुवंशिक-कारकाणां पर्यावरणीय-कारकाणां च प्रभावेन भिन्नः भवति । E.L थार्नडाइक् महोदयेन बुद्धेः त्रयः विभेदाः उक्ताः –

सामाजिक-बुद्धिः
अमूर्त-बुद्धिः
मूर्त-बुद्धिः

**सामाजिकबुद्धिः**

सामाजिकबुद्धिः अर्थात् तादृश्यः मानसिकक्षमताः यासां साहाय्येन मानवः कश्चन अन्यमानवैस्सह व्यवहारकुशलतां प्रदर्शयति । एतादृशजनानां सामाजिकसम्बन्धाः सुकराः

शोभनाश्च भवन्ति । समाजे तेषामादरमपि बहुगुणितं भवति । यथा -सुन्दरव्यक्तित्वसम्पन्नाः नेतारः,उत्तमाः शिक्षकाः इत्यादयः ।

**अमूर्तबुद्धिः**

अमूर्तबुद्धिः अर्थात् तादृश्यः मानसिकक्षमताः यासां साहाय्येन कश्चन मानवः शाब्दिक-गणितीयसंकेतान् प्रतीकचिह्नानि च सहजतया अवगम्य समुचितव्याख्यां विदधाति । तादृशजनाः येषु अमूर्तबुद्धिः अधिकः भवति ते विभिन्न-कलासु निपुणाः गणितज्ञाश्च भवितुमर्हन्ति ।

**अमूर्तबुद्धिः**

मूर्तबुद्धिः अर्थात् तादृश्यः मानसिकक्षमताः यासां साहाय्येन व्यक्तिः दृढवस्तूनां मूल्यम् अथवा महत्वं विज्ञाय विविध-परिस्थितिषु तेषां समुचितोपयोगं अथवा उचितरीत्या उपयोगं करोति । एतादृशबुद्धियुक्ताः पुरुषाः जनाः वा सफलव्यवसायिनः भवन्ति । विभिन्नमनोवैज्ञानिकैः बुद्धेः परिभाषाः अधोलिखिततया प्रदत्ताः –

- बंकिन्घम महोदयानुसारेण अधिगमयोग्यता एव बुद्धिः भवति ।
- बर्ट महोदयानुसारेण बुद्धिः एका योग्यता अस्ति या सम्यक्तयानिर्णेतुम् ,अवगन्तुम् , तर्कयितुं च साहाय्यं प्रकल्पयति ।
- बुडवर्थ महोदयानुसारेण बुद्धिः कस्यचित् कार्यस्य विधिः अस्ति ।
- वेशलर् महोदयानुसारेण बुद्धिः तादृशी क्षमता भवति यस्याः सहायतयामनुष्यः उद्देश्यपूर्ण-क्रियां करोति , विवेकशील-चिन्तनं करोतिवातावरणेन सह प्रभावकारीरीत्या समायोजनं च करोति ।

**बुद्धेः सिद्धान्ताः**

**एककारकसिद्धान्तः**

अस्य सिद्धान्तस्य प्रतिपादनं बिने महोदयेन कृतं तथा च टर्मन एवं स्टर्न इत्यादयः मनोवैज्ञानकैः कृतः । अस्य सिद्धान्तानुसारेण बुद्धिः एकः अविभाज्यः अध्यायः वर्तते ।

**द्विकारकसिद्धान्तः**

अस्य सिद्धान्तस्य प्रतिपादकः स्पीयरमैनवर्तते । एतदनुसारेण बुद्धौ द्विविधमानसिकयोग्यते भवतः ।

- सामान्य-मानसिकयोग्यता
- विशिष्ट-मानसिकयोग्यता

**प्रतिदर्श-सिद्धान्तः**

स्पीयरमैन महोदयस्य द्विकारकसिद्धान्तस्य विरोधे थाँम्पसनमहोदयेन अस्य सिद्धान्तस्य प्रतिपादनं कृतम् ।

**समूहकारक-सिद्धान्तः**

सिद्धान्तोऽयं थर्स्टनमहोदयेन प्रतिपादितः । थर्स्टन महोदयेन कारकविश्लेषणाधारेण सप्तविधमानसिकयोग्यताविषये उक्तम् –

- वाचिकभाषिकयोग्यता
- संख्यात्मकयोग्यता
- वस्तुक्षेपणयोग्यता
- प्रत्यक्षपरकयोग्यता
- स्मृतियोग्यता
- तार्किकयोग्यता
- शाब्दिकयोग्यता

**गिलफोर्डसिद्धान्तः**

अनेन बौद्धिकयोग्यतानां पञ्चसमूहाः उक्ताः –

- संज्ञानम्
- अभिसारी चिन्तनम्
- अपसारी चिन्तनम्
- स्मृतिः
- मूल्याङ्कनम्

**पदानुक्रमिकसिद्धान्तः** –

अस्य प्रतिपादकाः स्पीयरमैन महोदयाः वर्तन्ते । तेषु वरनन् महोदयः प्रमुखः । अस्य सिद्धान्तस्य आधारेण सामान्यमानसिकयोग्यता वर्गद्वये विभक्ता । प्रथमवर्गे बुद्धेः प्रायोगिकं तथा शारीरिककारकं द्वितीयवर्गे च मौखिकसांख्यिकीशैक्षिकानि इत्यादीनि कारकानि वर्तन्ते ।

****

## आधुनिकशिक्षायाः उद्देश्यानि

**अङ्कुश विश्वेश्वर हेगडे**
शिक्षाशास्त्रीप्रथमवर्षः
अनुक्रमांकः - 807

अत्र शिक्षा इत्युक्ते शिक्षायाः सङ्कुचितोऽर्थः स्वीकर्तव्यम् । नाम शालायां यत् शिक्षणं प्राप्यते तस्य आधुनिकोद्देश्यानि कानीत्युच्यते । अत्र "प्रयोजनम् अनुद्दिश्य न मन्दो अपि प्रवर्तते इतिवत् शिक्षणं सर्वत्र सर्वेषां कृते दातव्यम्" इत्युक्ते तस्य प्रयोजनम् उद्देश्यं च ज्ञातव्यं वक्तव्यम् ।

यथा विद्या दाने छात्राणाम् आसक्तिः, रुचिः, स्तराः वयोभेदेन भिद्यन्ते, तद्वत् उद्देश्यानि अपि। ते च प्राथमिकस्तर:, माध्यमिकस्तरः, उच्चस्तरः इति।

एतेषु त्रिषु स्तरेषु वैयक्तिकम्, सामाजिकम्, राष्ट्रियम्, अन्तराष्ट्रियम् इति चतुर्विधोद्देश्यानि क्रमेण पूरणमेव शिक्षायाः आधुनिकोद्देश्यानि । अत्र वैयक्तिकं नाम- आत्माभिव्यक्तिः, आत्मानुभूतिश्च एतयोः पूरणमेव। राष्ट्रियं नाम - धर्मनिरपेक्षता, राष्ट्रसम्पत्तेः संरक्षणं, राष्ट्रिय एकता एतेषां पूरणम्। अन्ताराष्ट्रियं नाम "वसुदैव कुटुम्बकम् " इति भावना, सद्भावना इत्यादि।

शिक्षायाः आधुनिकोद्देश्यम् - सर्वेभ्य: समानशिक्षा देयमिति । अतः संविधानस्य (२९/२) एकोनत्रिंशतितमे अनुच्छेदे धर्मः, जातिः, वंशः,भाषाद्याः यद्यपि सर्वेऽपि समानः न भवन्ति तथापि शिक्षा ग्रहणे तेषां मध्ये तरतमभावः नैव भवेत् इति उक्तम् । तथैव एकविंशतितमे अनुच्छेदान्तर्गते 'अ काण्डे' (२१/A) निश्शुल्का अनिवार्या च प्राथमिकशिक्षा इति उल्लिखितमस्ति । नाम षड्वर्षदारभ्य अष्टवर्षाणि यावत् नाम चतुर्दशवर्षपर्यन्तं शुल्करहितं शिक्षा ग्रहीत्वा साक्षराः भवेयुरिति। अत्र 'प्रोबेल् महोदयः' वदति "अस्मिन् स्तरे बालाः क्रीडासक्ताः भवन्ति, अतः क्रीडामाध्यमेन शिक्षा देया इति" । प्रायः कर्नाटकराज्ये ನಲಿ-ಕಲಿ इति नाम्ना प्राथमिकस्थरे शिक्षा क्रीडा माध्यमेन प्रचलति इति भामि । तथैव सौलभ्यार्थं मातृभाषा माध्यमेन शिक्षादेयमिति (३५०/क) पञ्चाशदुत्तरत्रिशततमे अनुच्छेदे उक्तमस्ति।

एवमेव अल्पसङ्ख्यकानां वर्गोद्धारं कर्तुं या शिक्षा अपेक्षते सा देयमिति उक्तम्। तथैव स्त्रीभ्यः समानाः शैक्षिकावसराः लभ्येरन्, ताः अपि साक्षराः स्युरिति उक्तम् । एवं रीत्या

सर्वेषामपि सर्वाङ्गीणविकासः भवेयुः इति उद्देश्यम् । सर्वाङ्गीणः नाम आन्तरिकः, बाह्यः, भौतिकः, नैतिकविकासश्च भवेयुः इति ।

अतः शिक्षायाः उद्देश्यं तु उन्नतस्थानं प्राप्तुमेव नास्ति । सर्वेषां सर्वाङ्गीणविकासार्थम् अस्ति समाजे जीवनयापनार्थं च ।

The main purpose of education is to open up the mind of students and purpose them face the world. But unfortunately students thinks education is getting a degree from required university and landing on a high paying job इति ।

****

## विदुरनीतिः

**शिबाजी साहु**
शिक्षाशास्त्री प्रथमवर्षम्
अनुक्रमाङ्कः - 809

सकलशास्त्रमर्मज्ञोऽयं विदुरः नीतिशास्त्रकोविदेषु अग्रगण्यः आसीत् । अयं हि महापुरुषः कृष्णद्वैपायनदास्योः सङ्गमेन द्वापरे च युगे जन्म अलभत । पाण्डुः धृतराष्ट्रश्च अस्य भ्रातरौ आस्ताम् । माण्डव्यमुनेः शापवशात् सनातन धर्मेव विदुररुपेण जन्मालभत् इति महाभारते उट्टङ्कितमस्ति । तद्यथा -

माण्डव्यशापाद्धि स वै धर्मो विदुरतां गतः ।
महाबुद्धिर्महायोगी महात्मा सुमहामनाः ।।

सुरगुरुः वृहस्पतिः असुरगुरुः शुक्राचार्यश्च विदुरस्य गुरु आस्ताम् इति श्रुयते। विदुरस्तु एतयोरपेक्षयापि बुद्धिमान् आसीदिति महाभारते एवम् उल्लिखितमस्ति । यथोक्तम् -

बृहस्पतिर्वा देवेषु शुक्रो वाप्यसुरेषु च ।

न तथा बुद्धिसम्पन्नो तथा स परूषर्षभः ।।

“विद् ज्ञाने ”धातोः“ कुरच् ”प्रत्यये कृते विदुरः इति शब्दः सिध्यति । ज्ञानिति अस्य शब्दस्य अर्थः वर्तते । विपद ग्रस्तः धृतराष्ट्रदूतमुखेन विदुरं समाहूयः हितमुपदिशतु इति विज्ञापयति। एतत् महाभारत उद्योगपर्वाण्याम् अस्ति। तत्रापि उद्योगपर्वणः त्रयस्त्रिंशतमध्यायात् चत्वारिंशतमाध्यायन्तं यः भागः वर्तते स एव भागः“ विदुरप्रकरणः ” अथवा“ विदुरनीतिः ”इति कथ्यते ।

“नीयते इति नीतिः ”अथवा“ नीयते पुरुषार्थफल जगत् यया सा नीतिः ”इति । नीतिपदस्य व्युत्पत्तिः विदुरस्य नीतिः विदुरनीतिः इति ।

****

## भारतीयानां भाषाविज्ञाने योगदानम्

करिस्मा बेहेरा

शिक्षाशास्त्रीप्रथमवर्षम्

अनुक्रमांकः-813

ज्ञानविज्ञानसंश्लिष्टं विश्वभाषाविभूतिमत् ।

ध्वनि-वाक्य-पद-ज्ञानं भाषाविज्ञानमिष्यते ।।

भाषाविज्ञानम् -भाषाविज्ञानस्य भाषाशास्त्रस्य च वर्तमानं रूपम् आधुनिकमेव । विद्यारुपेण उपविद्यारूपेण वा नास्य विज्ञानस्य पुरा नामोल्लेखः प्राप्यते । तथापि भारतवर्षे वैदिककालाद् आरभ्य भाषाविषयकं चिन्तनं विवेचनं विश्लेषणं चोपलभ्यते । एतदेवात्र समासतः प्रस्तूयते ।

**वेदा**ः- वेदः विश्ववाङ्मयस्य प्राचीनतमः निधिस्वरूपः ग्रन्थः । तत्र भाषाविज्ञानसम्बध्दाः निर्वचनादयः प्राप्यन्ते । तद्यथा वृत्रहन्शब्दादीनां निर्वचनं व्युत्पत्तिश्च, वेदेषुवृत्रं हनति वृत्रहा ।

यजुर्वेदे सर्वप्रथमं विश्लेषणार्थं व्या+कृ धातोः प्रयोग उपलभ्यते ।'चत्वारि शृंगा त्रयो अस्य पादा' इत्यत्र शब्दस्य नामाख्यातादिचतुर्विधरुपेण विवेचनं दृश्यते ।चत्वारि वाक् परिमिता पदानि' इत्यत्र वाचः परा-पश्यन्ती-मध्यमा-वैखरीति चतुर्भेदेन विवेचनं प्राप्यते ।

**वेदाङ्गानि**-वेदानां षडङ्गेषु शिक्षा व्याकरणं निरुक्तं छन्दश्चेति भाषासम्बध्दानि वेदाङानि । शिक्षाग्रन्था वस्तुतो ध्वनिविज्ञानस्यैव मूलरूपाः सन्ति । व्याकरणं वैदिकं व्याकरणं प्रातिशाख्यं च प्रकृतिप्रत्ययविभाजनद्वारा भाषाशास्त्रीयं विश्लेषणं द्योतयति । निरुक्तं निर्वचनप्रधानत्वात् संज्ञाशब्दानां निरुक्तिं व्याचष्टे । छन्दशास्त्रं पदानां लयात्मकं पाठं प्रस्तौति। एवं शिक्षा-व्याकरणं-निरूक्त-छन्दःशास्त्राणि भाषाविज्ञानस्य प्राचीनतमं रूपं प्रस्तुवन्ति ।

ब्राह्मणग्रन्था आरण्यकग्रन्थाश्च –ब्राह्मण ग्रन्थेषु इन्द्र-वरुण-वृत्रादिशब्दानां निर्वचनं तदर्थविवेचनं च प्राप्यते । ऐतरेयब्राह्मणे वाक् सप्तधा विभज्यते । सप्त विभक्तय इति भट्टभास्करः । गोपथब्राह्मणे ओंकारशब्दे धातु-प्रत्यय-उपसर्ग-निपात-विभक्ति-आदिभाषा-शास्त्रीयशब्दानां प्रयोगः सर्वप्रथमम् उपलभ्यते –

ओंकारं पृच्छामः,को धातुः,किं प्रातिपदिकम्,किं नामाख्यातम्,किं लिंगम्,किं वचनम्,का विभक्ति, कः प्रत्ययः,किं वै व्याकरणम्, किं स्थाननादानुप्रदानानुकरणम्(गोपथ पू१.२४) ।

व्याकरणेतरशास्त्राणि व्याकरणेतरग्रन्थेष्वपि भाषाशास्त्रीयम् अध्ययनम् उपलभ्यते । काव्यशास्त्रीयग्रन्थेषु शब्दशक्तेः ध्वनेश्च विवेचनं प्राप्यते । तत्रोल्लिखिताः ग्रन्थाः सन्ति - भरतमुनि-कृतं नाट्यशास्त्रम्, दण्डिकृतः काव्यादर्श, आनन्दवर्धनकृतो ध्वन्यालोकः, अभिनवगुप्तकृतं ध्वन्यालोकलोचनम्, भोजराजकृतं सरस्वतीकण्ठाभरणम्, विश्वनाथकृतः साहित्यदर्पणः च। दार्शनिकग्रन्थेष्वपि शब्दशक्तेः स्फोटसिद्धान्तस्य अर्थविज्ञानस्य च विवेचनं समासाद्यते।

आधुनिकसंस्कृतज्ञानां योगदानम् - भाषाविज्ञानस्य आधुनिकरुपेणाध्ययनं पाश्चात्यवित्साहाय्यमूलकमेव,तथापि केषांचित् भारतीयानामत्र विशेषतो योगदानं प्राप्यते ।तत्र मुख्याः विद्वांसः सन्ति -डा. रामकृष्ण गोपाल भण्डारकरः –Wilson:Philological Lectures; डा. सिद्धेश्वर वर्मा Phonetic Observations of Ancient Indian Grammarians; डा. सुनीतिकुमार चटर्जी Origin and Development of Bengali Language; डा. मंगलदेवशास्त्री-तुलनात्मकभाषाविज्ञानम्,डा. बाबुराम सक्सेना -सामान्य-भाषाविज्ञानम्, डा. भोलेनाथ तिवारी-भाषाविज्ञानम् । अन्येऽपि बहवो विद्वांसो विविधभाषाणां भाषाशास्त्रीये अध्ययने प्रवृत्ताः संलक्ष्यन्ते।

****

# प्राचीनभारते नारी

**रञ्जुला पधान**
शिक्षाशास्त्रीप्रथमवर्ष:
अनुक्रमाङ्क: - 814

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ॥ (मनु.2.12)

भारतीय समाजे नारीणां स्थानम् अत्यन्तं गौरवास्पदम् भवति। पुरुषस्य अर्धाङ्गिनी भवति नारी। नारी जननी ,भगिनी ,जाया ,माता प्रभृतयः विशेषणैः अन्तर्युक्ता भवति। समाजस्य तथा परिवारस्य अविच्छेद्य-अङ्गं भवति नारी। वेदेषु ,पुराणेषु ,लोककथासु नारीणां कर्त्तव्यं,दायित्वं ,स्थानम् च वर्णितमस्ति। भार्या त्रिवर्ग-साधिका भवति। अतः पुरुषः पत्नीं विना त्रिवर्ग-प्राप्तुं न शक्नोति।

**नारिणां विविधरुपाणि-**

प्राचीनभारते नारी जननी,जाया,भगिनी ,सहचरी रुपे वर्णितमस्ति।

**गृहिणी रुपम्**

नारीणां महत्वपूर्णभूमिका भवति गृहिणीरुपम्। गृहिणी परिवारस्य. प्रमुखम् अङ्गत्वात् गृहिणी इति कथ्यते।

**जननी रुपम्**

नारी जननी रुपे अत्यन्ता गौरवास्पदी अस्ति।

**सहचरी रुपम्**

प्राचीनभारते नारीणां सहचरीरुपं परिदृश्यमानमासीत्। परिवारस्य उत्तरदायित्वं निर्वाहनिमित्तं पुरुषेण साकं मिलित्वा सर्वेषु क्षेत्रेषु कार्यं सम्पादयति स्म।

**वैदिक समाजे नारी**

वैदिक समाजे नारीणां स्थानं महत्वपूर्णम् आसीत्। विविधकार्येषु पुरुषस्य सहायकर्त्री आसीत्। यज्ञसम्पादने पुरुषेण साकं नारीणां स्थितिः अनिवार्यं भवति। कारणं पत्नीं विना

यज्ञकार्यं कर्तुं न शक्यते । अस्मिन् कालिनसमाजे विद्या विनयसम्पन्नाः बुद्धिमत्यः नार्यः आसन् । परिवारस्यदायित्वनिर्वाहं कृतवती । शिक्षायाः व्यवस्था अपि आसीत् ।

**मौर्यकालिन समाजे नारी**

अस्मिन् काले नारीणां स्थानं महत्वपूर्णं नासीत् । स्त्रीशिक्षायाः अभावः आसीत् । पुरुषेण साकं समानाधिकारः नासीत् । यौतुकप्रथा प्रचलिता आसीत् । अष्टविध-विवाहप्रथा अपि प्रचलिता ।

**गुप्तकालिनसमाजे नारी**

गुप्तकालिनसमाजे वैदिकसमाज इव नार्यः यद्यपि प्रतिष्ठिता नासन्, तथापि तासां स्थानं महत्वपूर्णम् आसीत् । पुरुषस्य अर्धाङ्गिनी रुपे धर्मकार्यं योगदानं कृतवती । अष्टविधविवाहप्रथा प्रचलिता परन्तु राजकन्यानां विवाहनिमित्तं स्वयम्वरव्यवस्था आसीत् । उक्तं च कालिदासेन रघुवंशमहाकाव्ये –

सञ्चारिणीदीपशिखेव रात्रौ, यं यं व्यतिताय पतिम्बरा सा ।

नरेन्द्र मार्गट्ट इव प्रपेदे, विवर्णभावं स स भूमिपालः ।।

**राजपूतयुगे नारी-**

राजपूतयुगे नारीणां स्थानम् अत्यन्तं दुर्भाग्यजनकम् आसीत् । तस्मिन् काले नार्यः निर्जातिता आसन् । परन्तु काश्चित् विदुषीनार्यः अपि आसन् यासां स्वतन्त्र स्थानम् आसीत् ।

भारतीयसमाजे वैदिककालात् आरभ्य साम्प्रतं यावत् नारीणां स्थानम् स्वतन्त्रम् । यद्यपि अनेकेषु स्थलेषु ताः शिक्षासंस्कारादिक्षेत्रेषु वाञ्छिता आसन् तथापि

सभ्यसमाजपरिवारनिर्माणे तासां महत् योगदानम् आसीत्। परिवारस्य पुरुषस्य च अविच्छेद्यं अङ्गं भवति नारी। एतस्मात् कारणात् भारतभूभागः सर्वदा दैदिप्योमानः भवति। उक्तं च –

सानो माता भारती भूविभाषताम्।

****

## शिक्षादर्शनयोर्मध्ये सम्बन्धः

**सङ्गीत सुना**
शिक्षाशास्त्री प्रथमवर्षम्
अनुक्रमाङ्कः -821

शिक्ष् विद्योपादाने धातो: "गुरोश्च हलः" इति सुत्रेण 'अजाद्यतष्टाप्' इति सूत्रेण टापिप्रत्यये कृते शिक्षा इति शब्दः निष्पद्यते।

आङ्ग्लभाषायां शिक्षा इति शब्द: EDUCATION नाम्ना विधीयते। Education इति पदं लेटिन् educare, educere तथा educatum त: निष्पद्यते।

- Educare – To bring up, To raise, To educate. लालनम् अथवा पालनम्।
- Educere – To bring out, To lead out. प्रेरणा अथवा प्रथमदर्शनम् इति।
- Educatum – E=Out of , duco = to extract out.आन्तरिकशक्ते:बहिरानयनम् अथवा अन्तस्थशक्तीनां बहिरानयनम्।

**दर्शनम्**

दृश्यते ज्ञायते यथार्थतया पदार्थो अनेन इति दर्शनम् ।दर्शनम् इति शब्द: आङ्ग्लभाषायां PHYLOSOPHY इति उच्यते । Phylosophy इति पदं philos तथा Sophia ग्रीक् पदाभ्याम् आगत: । Philos शब्दस्य अर्थ: भवति love, तथा Sophia इति पदस्य अर्थ: भवति wisdom .अत: philosophy शब्दस्य अर्थ: भवति love for wisdom . अर्थात् ज्ञानानुराग: ।

शिक्षादर्शनयोर्मध्ये सम्बन्ध-अवसरे जन् एडम्सवर्यस्य मतम्-

- तत्वशास्त्रस्य आचरणात्मकं रुपं भवति शिक्षा ।
- शिक्षा दर्शनस्य गत्यात्मक: पक्ष: अस्ति ।
- जीवनोद्येश्यप्राप्त्यर्थं व्यावहारिकं साधनं शिक्षा भवति ।
- दार्शनिकविश्वासस्य क्रियाशीलपक्ष: शिक्षा भवति ।

य: शिक्षां ददाति, स: न तु केवलं शिक्षक:, अपितु स: एक: दर्शनिक: । स्वस्य दर्शनेन कक्षायां बालकानां चरित्रनिर्माणं कर्तुं शक्नोति ।

**शिक्षादर्शनयोर्मध्ये सम्बन्ध:-**

शिक्षा दर्शनं च एकस्य नाणकस्य पार्श्वद्वयं वर्तते ।

शिक्षादर्शनस्य विषये बन्किन्घम् महोदय: लिखितवान् "दर्शनं सर्वेषां वस्तूनां विज्ञानं वर्तते" इति । इतिहास: प्रमाणयति यत् मठसंस्था: स्वीयधार्मिकोपदेशप्रदानाय स्वीयमतविश्वासानां प्रचाराय प्रसाराय च शिक्षां प्रमुखसाधनरुपेण आश्रयन्ते । शिक्षादर्शनयोर्मध्ये एतादृशानि बहूनि सम्बन्धानि कल्पितानि । शिक्षा दर्शनं च उभावपि अपि परिपूरकौ ।

****

# सा विद्या या विमुक्तये

**चिन्मय भट्ट:**
शिक्षाशास्त्री प्रथमवर्षम्
अनुक्रमाङ्क: - 824

**विद्याया: स्वरूपम्**

'विद्या' शब्दस्य 'ज्ञानम्' इत्यर्थ: । 'विद्'ज्ञाने इति धातो: रूपमेतत् । विद्यते अनया,विदन्त्यनेनेति वा विद्या इति विद्याशब्दस्य व्युत्पत्ति:।कस्यचिदपि वस्तुनो विषयस्य वा सम्यग् ज्ञानं विद्येत्यभिधीयते।वेद-शास्त्र-विज्ञानादीनां साध्वनुशीलनं तत्वार्थज्ञानं च विद्येति स्वीक्रियते । न केवलं विद्यया ज्ञानम्, अपि च विनयस्य,धर्मस्, सुखस्य च सिद्धिर्भवति । तदभिहितं सुभाषितकारै: यत् -

विद्या ददाति विनयं विनयाद्याति पात्रताम् ।

पात्रत्वाद्धनमाप्नोति धनाद्धर्म: तत: सुखम् ।।

**विद्याया:भेदा:**

ज्ञानं च लौकिकमलौकिकं चेति द्विविधं भवति।तयोरेव पराविद्या अपराविद्या इति नाम्नी स्त: । सम्पूर्णं वैदिकसाहित्यं 'परा विद्या' इति नाम्ना कथ्यते । उपनिषदनुसारं द्वे विद्ये-परा अपरा च । तत्र अपरा वेदा वेदाङ्गानि च । अर्थात् तत्रापरा चतुर्वेदा:, शिक्षा, कल्प:, व्याकरणं, निरुक्तं, छन्द:, ज्योतिषमिति । यया लौकिकं ज्ञानं जायते, सा अपरा विद्या । **"यया तदक्षरमधिगम्यते, यया च अक्षरब्रह्मविषयकं ज्ञानं जायते, सा परा विद्या (मुण्ड**कोप.१/१/४,५)।

शास्त्रकारैः विद्या द्विधा प्रतिपादिता - शास्त्रविद्या शस्त्रविद्या च । शस्त्रविद्या वृद्धावस्थापतिते केवलं हास्यायैव भवति, शास्त्रविद्या सततं वृद्धिमाप्नोति यथा यथा मानवः आयुषो वर्द्धते तथा तथा विद्यापि वर्द्धते । शस्त्रविद्या तु क्षीणकायशक्तौ शनैः शनैः क्षीणतां प्रयाति –

शस्त्रविद्या शास्त्रविद्या च द्वे विद्ये प्रतिपत्तये ।
आद्या हास्याय वृद्धत्वे द्वितीयाद्रियते सदा ॥ (हितोपदेश:- ७)

**विद्याधनं सर्वधनप्रधानम्**

विद्याधनं प्रधानमस्ति ।यतोहि वस्तुनः विषयस्य च ज्ञानं विद्यामाध्यमेनैव भवति । विद्या तु मनुजस्य तृतीयं नेत्रमिति कथ्यते । आपणे लभ्यमानः वस्तु नैव इयं विद्या । इमां विद्यां प्राप्तुं महान् प्रयासः करणीयः, यया सर्वोऽपि मानवीयो मनोरथोऽभिलाषो वा पूर्यते । अनया विद्यया कर्तव्याकर्तव्य ज्ञानं, धर्माधर्मपरिज्ञानं, पुण्यापुण्यविवेकः, लाभालाभावबोधश्च जायते । अस्याः प्रधानत्वं एवमुक्तं पूर्वसूरिभिः यथा –

न चोरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्द्धते एव नित्यं विद्याधनं सर्वधनधानम् ॥(सुभा. र .३०)

विद्या हि प्रच्छन्नं गुप्तं धनं विद्यते, विदेशे सा एव सर्वोत्कृष्टा बन्धुः, सा गुरूणामपि गुरुः, देवानामपि अधिदेवः तस्मात् विद्यावान् सर्वत्र पूज्यते । अतः साधु कतिथं केनापि -"विद्याधनं सर्वधनप्रधानमिति" । यदि विद्या कश्चित्पुरुषेण नार्जिता सः पशुसमानः, समाजे तस्य गौरवं स्थानमानं च निन्दितं भवति । "विद्याविहीनःपशुः" इति भर्तृहरिणा मुक्तकण्टेन घोषितम् । नीतिशतके तस्यमुखादेव निःसृतं वाक्यमिदं यत् –

येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः ।
ये मर्त्यलोके भुविभारभूताः मनुष्यरूपेण मृगाश्चरन्ति ॥

विद्या मानवस्य किं किं न साधयति? अपि तु कल्पलतेव सर्वसुखसाधिका, सर्वगुणप्रदा, सर्वाभीष्टसन्धात्री । एषा मातृवत् संरक्षिका, पितृवत् सत्पथप्रदर्शिका, कान्तावत् सुखदा मनोरञ्जिका च, कीर्तिप्रदा, वैभवदायिनी, दुर्गुणनाशेन मनसः पावयित्री च । सर्वमनोरथपूरणात् सेयं कल्पलतया उपमीयते । कतिथं च भोजप्रबन्धे –

मातेव रक्षति पितेव हिते नियुङ्क्ते कान्तेव चाभिरमयत्यपनीय खेदम् ।
लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिं किं किं न साधयति कल्पलतेव विद्या ॥

इयं विद्या जनान् समुन्नतिपथे नयति । विद्यया एव मानवे विचारशक्तिः समुपजायते । जाति-धर्म-भाषागत तारतमां दूरीकृत्य राष्ट्रैक्यतां साधयति । लौकिकविद्यायाः मूलोद्धेशः अयमेव वर्तते यत्, मानवान्तर्गत शक्तेः बहिरानयनम्, स्वामिविवेकानन्दानाम् चिन्तनमपि इदमेव आसीत् । परमद्यत्वे विद्या केवलं धनार्जनस्य कृते एव इति तु शोचनीयः विचारः ।

एवं रूपेण इयं विद्या लौकिककार्ये कर्तव्ये च स्वशक्तीं समग्र, विस्ताररूपेण च प्रकटयति।अस्याः विद्यायाः अपरं मुखं वर्तते, यया निखिलजीवप्रपञ्चः सुखशान्तिपदे चिरं प्रतिष्टति । सत्यं,अयमेव विद्यायाः नैजस्वरूपः नैजोद्धेश्यं च । स्वयं भगवानेनैव प्रोक्तं यत् –

ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति । (भ.गी.४/३९)

वस्तुतः अस्मिन् दुःखोदके संसारे विद्यायाः माध्यमेन दुःखसागरात् पारं गन्तुं शक्यते । दुःखानां मूला तु अविद्या एवास्ति । यदा वेदविहितकर्मणा चित्तशुद्धिर्जायिते तदा जन्मगत कुसंस्काराः समूलमुत्पाटिताः भवन्ति । यथान्धकारः एकस्मादग्निस्फुलिङ्ग कणात् निर्गच्छति, तथा अविद्याऽपि विद्यया एव अपगच्छति।

ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ।(भी.गी.४/३७)
“विद्ययाऽमृतमश्नुते","विद्यया विन्दतेऽमृतम्"(ई.उ.)।

अत: सर्वदा सर्वै: विद्या एव समाश्रयणीया आराधनीया च।कदाचिदपि विद्वत्त्वं च नृपत्वं च न तुलनीयम्।तदुक्तं केनचित्"विद्वत्त्वं च नृपत्वं च नैव तुल्यं कदाचन", "सुकविता सुविद्या वा यद्यस्ति तर्हि राज्येन किम्" इति । विद्या "ज्ञानम्" ज्ञानञ्चात्मशोधकं भवति । अनया विद्यया स्वात्मपरिष्कार: लोककल्याणं मोक्षप्राप्तिश्च भवति ।

****

## मम महाविद्यालयः

**रवीश जोशी**
शिक्षाशास्त्रीप्रथमवर्षम्
अनुक्रमाङ्क:- 825

मम महाविद्यालयो नगराद् बहिः एकान्ते सुन्दरे प्रदेशे स्थितो अस्ति । महाविद्यालयस्य भवनं निरीक्ष्य चेतो नितान्तं हर्षमनुभवति । महाविद्यालयस्य रमणीयता च न कस्य चेतो बलाद् हरन्ति **?** महाविद्यालयो अस्माकं कृते न केवलं पाठशाला अस्ति**,** अपितु अस्माकं सर्वस्वमस्ति । अस्माभिरत्रैव अध्ययनं क्रियते**,** सदाचारस्य पाठः पठ्यते**,** विनयस्य अनुशासनस्य च शिक्षणं गृह्यते**,** समाजसेवाया देशभक्तेश्च भावना अत्रैव प्राप्यते । किमन्यत् जीवनस्य यत् कर्तव्यमस्ति**,** तत्सर्वमपि अत्रैव लभ्यते । अत एव महाविद्यालयः अस्माकं कृते **"**विद्यामन्दिरम्**"** अस्ति ।

मम महाविद्यालये अध्यापकानां प्राध्यापकानां च संख्या त्रिशदधिका वर्तते । छात्राणां च पञ्चशदधिका वर्तते । प्रायः पञ्चाशदधिका बालिकानाम् अपि संख्या वर्तते । महाविद्यालयस्य आचार्यवर्याः अतीव प्रखराः विविधविद्यापारङ्गताः विद्वान्सः सन्ति । तेषां तेजोमयं वदनं वीक्ष्य छात्राः श्रद्धावन्तः भक्तिभावोपेताश्च भवन्ति । अध्यापकेषु च बहवो

महाविद्वान्सः सन्ति। सर्वे अपि स्वस्वविषये अतीव विशारदाः सन्ति। तेषां शिक्षापद्धत्तिरपि बहुमनोरमा वर्तते । छात्रा अपि प्रायो व्युत्पन्नबुद्धयः सन्ति । शिक्षायाः समीचीनत्वादेव अन्यप्रान्तेभ्यः अपि छात्रा अत्रैवाध्ययनार्थमागच्छन्ति। राजकीयपरीक्षासु च विशिष्टं स्थानम् अस्मद्विद्यालयीयाः छात्रा लभन्ते। न केवलं पठने एव छात्रा योग्यतमाः सन्ति, अपितु क्रीडने धावने वाक्प्रतियोगितासु अनुशासने संयमे समाजसेवायां देशसेवायामपि च तेषां स्थानं सर्वप्रथममेव विद्यते । अस्माकं महाविद्यालये विद्यार्थिनां कृते क्रीडनार्थं क्रीडाक्षेत्रं सुविस्तृतमस्ति । विविधभाषासु पाटवार्थं विविधाः परिषदः सन्ति । ये क्रीडनादिषु स्थानं लभन्ते ते पुरस्कारादिकमपि लभन्ते। ये किमपि शोभनं कार्यं कुर्वन्ति, ते सदा पुरस्कृताः भवन्ति, विद्यालये सम्मानमादरं च लभन्ते । छात्राणां स्वास्थ्यवृद्ध्यर्थं व्यायामस्य, मल्लयुद्धस्य अन्येषां चोपयोगिवस्तूनां प्रबन्धो अस्ति। अत एव छात्रा हृष्टाः पुष्टाः सन्ति। छात्राणां स्वास्थ्यं निरीक्ष्य सर्वेषामपि जनानां चेतः प्रहर्षमाप्नोति।

साम्प्रतमस्माकमेतत् कर्तव्यं भवति यत् सर्वथा वयं महाविद्यालयस्य कीर्तिं दिक्षु विस्तृतां कुर्याम। एवमस्माकमपि यशो वृद्धिं प्राप्स्यति।

अनन्तशास्त्रं बहुलाश्च विद्याअल्पश्च कालो बहुविघ्नताश्च।
यत्सारभूतं तदुपासनीयं हंसो यथा क्षीरमिवाम्बुमध्यात्॥

अथवा

विद्या नाम नरस्य कीर्तिरतुला भाग्यश्रये चाश्रयो,
धेनु कामदुघारतिश्च विरहे नेत्रं तृतीयं च सा।
सत्कारायतनं कुलस्य महिमा रत्नैर्विना भूषणम्,
तस्मादन्यमुपैति सर्वविषयं विद्याधिकारं कुरु॥

****

# शरीरमाद्यं खलु धर्मसाधनम्

**मधुस्मिता मिश्र**

शिक्षाशास्त्रीप्रथमवर्षम्

अनुक्रमांक: -826

अस्माकं संस्कृतौ धैर्य्य-विनयादि गुणानां गौरवेण समं वपुषा गौरवमपि मानवस्य समुचित विकासाय अपेक्षितम् । अस्माकं शरीरं बलिष्ठमेव सदा स्यादिति कामना वैदिकैः ऋषिभिरसकृत् कृता । मनसि उत्साहः अभ्युदयकामना वपुषि च कार्कश्यं स्यादित्यासीत् तेषामादर्शः । अत एव यजुर्वेदे उक्तम्-

अश्मा भवतु नस्तनु

स्वस्थशरीरेएव स्वस्थ मनो निवसतीति निर्विवादम्। अतएव या संस्कृतिः विचारसारणिर्वा शरीरमपेक्षया प्रवर्त्तते तदनुयायिनां विनाशः अवश्यम्भावी। मानवजीवने शरीरस्यमहत्वं सर्वातिशायि । शरीरं खलु संसारस्य सर्वेषामपि कार्यव्यापाराणां मूलम् । मानवो यत् किमपिकर्त्तुमभिलषति,यत् किमपि अभीप्स्यते, तस्य आद्यमुपकरणं भवति शरीरमेव । अत एव कविः कालिदासः उद्घोषयति-

शरीरम् आद्यं खलु धर्मसाधनम् ।

स्वस्थो देहः सर्वेषामपि समाजोन्नेतॄणां कविचिन्तकानां कृते प्रथमः कल्पः। संस्कृतकाव्येषु दुष्यन्त-दिलीप-रघु-रामार्जुन-श्रीकृष्णप्रभृतयः सर्वेऽपि नायकाः बलिष्ठदेहसंपन्नाः । शीलस्य सौन्दर्येण सह शरीरस्य सौष्ठवमपि आदर्शनायके कविना अपेक्ष्यते । यथा-

अनवरतधनुर्ज्यास्फांलनक्रूरपूर्वरवि.....(अ.शा)

स्वस्थो नरः कठिनतममपि कर्म सत्वरं संपादयति। स सदैव अनलसः प्रसन्नश्च भवति। व्यसनमापन्नोपि स धैर्यं न जहाति। अध्यवसाये विपदं जयति च। दुर्बलदेहधारिणः अशक्ताः निरूत्साहाश्च भवन्ति । महाकविना भासेन उक्तम्-

"कातरा येप्यशक्ता वा नोत्साहेषु जायते" ।

शरीरे बलिष्ठता संपादनाय आहारो व्यायामश्चापेक्ष्यते । व्यायामेन शरीरस्य सर्वासु शिरासु रक्तं तीव्रं संचरति, जठराग्निर्दीप्यते,शरीरं च पूष्टिं गच्छति, रोगाश्चापसरन्ति।

शरीरस्य दृढता मनसि दृढतामुत्पादयति । संधर्षबहुलं खलु अद्यतनं जीवनम्। विषमश्चायं कालः । अतैव मनसि विवेकः स्थैर्यं तथा च धैर्यं समधिकतरमिदानीमपेक्ष्यते। तत् तुशरीरस्य सुदृढतयैव साध्यमिति नास्ति संशीतिलेशः। निर्बलः पुरुषः न केवलं सांसारिकम् अपितु आध्यात्मिकीमपि श्रियं लव्धुं न प्रभवति । अतैव साधूक्तम् -

धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्।

****

## स्त्रीशिक्षायाः आवश्यकता

**संजय सरकार**

शिक्षाशास्त्रीप्रथमवर्ष:

अनुक्रमाङ्क: - 831

अस्मिन् स्वतन्त्रे भारते स्त्रीशिक्षायाः महत्वपूर्णं स्थानं वर्तते । स्त्रीय एव एता मातृशक्तेः प्रतीकभूताः । निसर्गाद् एव एतासु पतत्युत्तरदायित्वं शिशोर्भरणस्ष पोषणस्य च गृहस्य

संचालनस्य संस्थापनस्य च। स्त्रिय एव अस्माकं देशे मातृशक्तिरूपेण पूज्यन्ते। जन्मदातृ-पालनकर्तृरूपेण प्रतिष्ठिताः सुशोभन्ते। अस्माकं भारतीषसंस्कृत्यनुयायिनां कुलेषु तु शिशूनां जननानन्तरं तेषां भरणपोषणम् उत्तरदायित्वं मातुणाम् एवोपरि आपतति। गृहकुटुम्व-संचालनस्य गृहस्थजीवनस्य सुखशान्त्योः श्वशुरश्वश्वोः स्वायाः शिशूनां शैशवावस्थायां पाठस्य, तेषु सच्छीलनिधानस्य पदे-पदे भर्तुः सहयोगस्य, सद्भावोन्नयनस्य अभ्यागतीतिथीनां सपरियायाश्च प्रभारो गृहपत्नीरूपायाः स्त्रियः एवोपरि आपतति। ईदृशानां कार्यभारीणाम् उत्तरदायित्वं वहनकर्तुं ताः एव स्त्रियः समर्थाः भवितुमर्हन्ति याः सच्छिक्षायाः पूतजल्न अभिषिक्ताः भवन्ति। वैदीककाले स्त्रीभ्यः अनेकानिधार्मिककार्याणि विहितानि आसन्। ऋग्वेदे श्रद्धा, कामायनी, यमी, शची, इन्द्राणी, अदितिः, आत्रेयी, अपाला, रेमशा, घोषा, उर्वशी, सीवित्री, गोधा, विश्ववारा, सिकता, निवावरी, लोपामुद्रप्रभृतयः स्त्रियः मन्त्रदर्शनेन स्वकीयानां वैदुष्यं गौरवश्च प्रकाशयाञ्चक्रुः। इत्थं इदं स्पष्टरूपेण कथयितुं शक्यते यत् स्त्रियः अपि शिक्षायाः सत्पात्राणि अभूवन् सन्ति भविष्यन्ति च। तासामपि शिक्षणं अत्यावश्यकम् अनिवार्यञ्च विद्यते।

**स्त्रीशिक्षायाः उपयोगिता**

यथा पुरुषाणां कृते शिक्षायाः अधिकारोऽस्ति तथैव स्त्रीणां कृतेऽपि। सुशिक्षितैव नारी सग्गृहिणी सती साध्वी कर्मपरायणा वंशप्रतिष्ठास्वरूपा च भवितुमर्हति। सैव सद्वृत्तादिसद्गुणगणान्वितां सन्ततिं विधातुमीष्टे। गृहस्य सर्वैः जनैः नारीणां सुखस्य प्रसन्नतीयाश्च चिन्तनं क्रियते तत्र सदैव लक्ष्म्याः वासो भवति। अतः मातृशक्तेः शास्त्रेषु महद् गौरवम् अनुश्रूयते। उक्तं च मनुना-

यत्र नार्यस्तुपूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रिया॥ (मनु३/५६)

अतः यथा मातरो भवन्ति, येषां तथैव सन्ततिः अपि । यदि मातरः अशिक्षिताः अज्ञानिनः कर्त्तव्यबुद्धिहीनाश्च भविष्यन्ति तर्हि कथं ताः स्वशिशुन् सम्यक्तया पालयिष्यन्ति । अतः महानिर्वाणतन्त्रानुसारं - कन्याऽप्येवं लालनीया शिक्षणीया प्रयत्नतः । गृहाधिष्ठातृदेवतात्वात् सागृहिणी, गृहस्वामिनी, गृहलक्ष्मीः इति यादि शब्दैः संस्तूयते । तत्सत्त्वादेव गृहं गृहमित्युच्यते । उच्यते च -

न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते ।

गृहं तु गृहिणीहीनं कान्तारागकिरिच्यते ॥ (पञ्चत.३/१४६)

एवं स्त्रीणां शिक्षोपरि यदि गम्भीर्येण विचार्येत तर्हि तासामपि जीवने शिक्षायाः भूयसी आवश्षकतानुभूयते । मातरः स्त्रियश्च सर्वत्रैव समादरमर्हन्ति । देशस्य समाजस्य च समुन्नत्यै स्त्रीशिक्षा नितरामावश्यकीत्यवगन्तव्यम् । अतः अस्माभिः सर्वैः स्वकीयानां कन्यकानां पठनपाठनोपरि गाम्भीर्येण विचारणीय: तदनुसारं च समाचरणीयम् ।

****

## शिक्षासौरभम्

**मंगतायारु गुम्मडि**
शिक्षाशास्त्री प्रथमवर्षम्
अनुक्रमांकः - 832

सर्वे धनिनः निर्धनाः च देशेप्रगतिं कामयन्ते इति तु सत्यम् । जनाधिक्ये भारते तत्सद्दृशे राष्ट्रे नेकैः जनाः दरिद्राः इति कृत्वा तेषु देशस्य प्रगतिप्रचेष्टायाः अर्थः भवति अर्थनीतिकविकाशदिशी चिन्तनं इति । किन्तु खेदस्य विषयः यत् स्वातन्त्र्यस्य द्विषष्टेः वर्षाणां

अनन्तरमपि देशे सामान्यजनानां जीवनधारणमूल्यस्य च विशेषपरिवर्तनं नाललोक्यते इति। देशस्य दरिद्रस्य दूरीकरणं, कर्मनियुक्तिः इत्यादीनां समस्यानां समाधानाय अत्यधिकव्ययेन प्रस्तुतायां योजनायामपि सुमहान् परिणामः जनेषु प्रसृतः न दृश्यते । मानवविकासः एव अर्थनीतिकवकासस्य मूलम् । मानवविकासाय शिक्षा अनिवार्या । अस्मद्देशस्य शिक्षाव्यवस्थ एव शिक्षित: निरुध्योगसमस्यां जनयति । श्रमशक्तेः गुणात्मकमूल्यवर्धनेन, जनानां द्रृष्टिः परिवर्तनेन च शिक्षा असफला प्रतीयते। स्वदेशशक्तिसर्जनं, सन्चयाभिवृद्धिः, वृत्तिगतव्यवस्था परिवर्तनं इत्यादीन् विषयान् अवलम्बते देशस्य प्रगतिः । एतत्सर्वं शिक्षा व्यवस्थद्वारा एव सम्भवेत् । एतन्निमित्तमपि देशे राजनैतिकस्थिरता अनुशासितप्रशासनं च अनिवार्य । यस्य देशस्य शिक्षाव्यवसथ उन्नत, सः देशः तावन् प्रगति शीलः । शिक्षाव्यवसथायां नैतिकत्वं, बौतिकत्वं, सामाजिकत्वं, धार्मिकत्वं, आध्यत्मिकत्वं च तत्वानि सन्निविष्टानि स्युः । अतः प्रचलितायां राष्ट्रसर्वकारीयां शिक्षव्यवसथायां अपेक्षितसंस्कारं सम्पाध्य शिक्षायाः मूल्यवृद्धये शिक्षासंस्थानं बौध्दिक विकासे च अधिकं महत्वं प्रदेयं, तदैव शिक्षा विकासस्य निर्णायिका भवितुम् अर्हेत्।

****

## शिक्षा एका आजीवनप्रक्रिया

**बसन्त बाहाला**

शिक्षाशास्त्री प्रथमवर्षम्

अनुक्रमाङ्क: - 833

मानवविकासस्य मुख्या सहायिका भवति शिक्षा । यया बालकस्य जन्मजातशक्तीनां विकासः सञ्जायते । एवञ्च ज्ञान-कला-कौशलेषु च केवलं वृद्धिः अपितु मनुष्यस्य व्यवहारे परिवर्तनमपि क्रियते । अत्र शंका समुदेति यत् विद्या शिक्षा वा का ? सन्दर्भेऽस्मिन् शास्त्रेषु बहु

प्रमाणं लिखितमस्ति । आदिमयुगान्नतरं मानवस्य समक्षे यदा शिक्षायाः महत्वमागतं तदा आत्मानं शिक्षितकरणाय लक्ष्यं निश्चित्य एतस्याः अर्थः समुद्घाटितः । अस्माकं प्राचिनवाङ्मये विषयेSस्मिन् बहुक्तमस्ति यथा - विद्ययामृतमश्नुतेः सत्यं ज्ञानमनन्तं ब्रह्मा ।

साहित्यसंगीत कला विहीनः ।

साक्षाद् पशु: पुच्छविषाणहीनः ।।

"विद्याया विन्दतेSमृतम्" इत्युक्ति: शिक्षायाः सार्थकता आवश्यकता उपयोगिता लक्ष्यं च निर्धारयति । शिक्षाशब्दः संस्कृतभाषायाः शिक्ष् धातोः निष्पन्नः यस्यार्थः ज्ञानोपार्जनं शिक्षणं च भवति । मानवः संसारेSस्मिन् स्वानुभवेन सर्वदा यत्किञ्चित् शिक्षयति एव । पाषाणयुगतः आरभ्य यन्त्रयुगयावत् एतस्याः उद्देश्यं कार्यतत्वं क्षेत्रं च परिवर्तितं जातम् । आखेटकार्यतः कृषिकार्ययावत् अग्नेः आविष्कारतः चक्रस्याविष्कारपर्यन्तं यत्किमपि मानवेन कृतं तत् सर्वं शिक्षाया एव संपाद्यते ।

आंग्लभाषायां शिक्षा शब्दस्योत्पत्तिः लैटिनभाषायाः त्रिभ्यः शब्देभ्यः मन्यन्ते । यथा - Education

1-Education(Act of teaching of training) 2-Educare(To educate to bring up:to raise)3-Educere (To bring forth to lead out.)

एवं प्रकारेण शिक्षा इति शब्दस्यार्थः प्रशिक्षणं, संवर्ध्दनं, पथप्रदर्शनं च भवति । उपयुक्तं सर्वे अर्थाः शिक्षायाः क्रियाप्रतिक्रियायाः संकुचित-व्यापटभेदाश्च प्रदर्शयन्ति । शिक्षायाः अपरार्थः Education इति द्वाभ्यां शब्दाभ्यां निर्मितौ जातौ E+Duck; `E'। इत्यश्यार्थः आन्तरिक `Duco'शब्दस्यार्थः बहिरानयनम् ।

अतः अन्तः शक्तीनां क्षमतानां च बहिर्प्रकाशनमिति । शिक्षा आजीवनं प्रचल्यमाना प्रक्रिया अर्थात् जन्मतः आरभ्य मृत्युपर्यन्तं प्रचलति । स्वस्थशरीरे स्वस्थमनसः निर्माणमेव शिक्षा इति शिक्षाशाश्त्रीणः वदन्ति ।

****

# सुराष्ट्रनिर्माणे शिक्षकस्य भूमिका

**अशोक डंगवाल**

शिक्षाशास्त्रिप्रथमवर्षम्

अनुक्रमांक: - 835

भारतीयसंस्कृते: एकं सूत्रवाक्यं वर्तते - '**तमसो मा ज्योतिर्गमय**' अर्थात् तमस: प्रकाशं प्रति गमनम् । इमां प्रक्रियां वास्तविकतया सम्यक्कुर्वन्ति - शिक्षा, शिक्षक:, समाजश्च । अत्र त्रयाणां मुख्यभूमिका भवति । भारतीयसमाजे शिक्षासंस्कृत्यो: विषये प्राचीनकालाद् प्रभृत्येव बहु समृद्धशील: वर्तते । यत्र शिक्षां वपु:, मन:, आत्मा च विकास्य साधनं मन्यते , तत्रैव शिक्षक: समाजे समग्राभिव्यक्ति: विकासस्योत्तरदायी भवति ।

शिक्षाया: केन्द्रीयघटकत्वेन विद्यार्थी भवति, तच्च सुदिशि निर्देशनप्रदर्शने प्रमुखघटकत्वेन शिक्षक: भवति । शिक्षाया: अनेकानामुद्देश्यानां पूर्ति: शिक्षकमाध्यमेनैव भवति । शिक्षायां शिक्षकैव सामाजिकविकासस्य सूत्रधार: भवति । वास्तविकतया कस्यचित् समाजस्याभिलाषाम्, आकांक्षाम्, आवश्यकताम्, अपेक्षताम्, आदर्शाञ्च पूर्तिं शिक्षकैव कर्तुं शक्नोति । भारतवर्षस्य महान् शिक्षाविद् डॉ. सर्वपल्ली राधाकृष्णन्महोदय: यदा द्वाषष्ट्योत्तरविंशतिशततमे (1962) राष्ट्रस्य राष्ट्रपते: पदवीमासीना: अभवन्, तदा तेषां स्पृहालव: तेषां जन्मोत्सवस्योपलक्ष्ये सितम्बरमासे पञ्चदिनांके 'शिक्षकदिवस:' मन्यन्ते । डॉ.

राधाकृष्णन्महोदय: शिक्षामेकां योजनयापश्यत् - तेषामनुसारेण शिक्षकस्य पदाधिकारी सैव व्यक्ति: वर्तते, य: अन्येभ्य: जनेभ्य: अपेक्षयाधिका मनीषा विनययुक्तश्च भवतु। उत्तमाध्यापनेन सह शिक्षकस्य स्व विद्यार्थिन: प्रति व्यवहार: स्नेहश्च तं सुयोग्य शिक्षकं घटते । ज्ञानेन शिक्षकत्वं नागच्छति, अपितु शिक्षकेन शिक्षकत्वगुणस्यार्जनं क्रियते | शिक्षामात्रेण सूचितं ज्ञानदानं नैव भवति वरन् तस्योद्देश्यमेकमुत्तरदायी सुनागरिकनिर्माणं भवति । श्रूयते यत् जीवने शिक्षक: नास्ति चेद् शिक्षणमपि नास्त्येव । 'शिक्षणं' नाम शिक्षा प्रदानकरणं, यस्याधारशिलास्ति शिक्षक: । भारतीयसमाजे शिक्षका: सदैव आदरणीया: पूजनीयाश्च भवन्ति, यतो हि तं गुरुमेव कथ्यते। परन्तु वर्तमानसामाजिकवातावरणे आगच्छद्भि: परिवर्तनै: शिक्षका: अप्यभिन्नांगानि न वर्तन्ते । चिन्तनीयो विषयो वर्तते - साम्प्रतिककाले शिक्षाया: अर्थ: पुस्तकीयज्ञानमात्रं विद्यते, तथा च विश्वविद्यालये उत संस्थाने सुसम्यक् अंकान् प्राप्य तेन स्वद्योगं प्राप्तं तदेवोद्देश्यं वर्तते । शिक्षाकाणां गुणा उत पाठनशैल्य: विधय: वा कथं भवेयु: । शिक्षकस्य कीदृशं विषयज्ञानं भवेत् इत्यस्मिन् विषये महाकवि: कालिदासस्यैकं पद्यमुद्धृतमस्ति , य: उल्लिखितं वर्तते -

श्लिष्टा क्रिया कस्यचिदात्मसंस्था संक्रान्तिरन्यस्य विशेषयुक्ता।

यस्योभयं साधु स शिक्षकाणां धुरिप्रतिष्ठापयितव्य एव॥

अर्थात् "कस्यचिदेकस्य शिक्षकस्य विषये मूलाध्ययनं गूढात्मकाध्ययनं वा भवति , अपरे (शिक्षके) तज्ज्ञानं प्रदानाय प्रशिक्षणाय च क्षमता भवति । परन्तु यस्मिन् शिक्षके ज्ञानप्रशिक्षणयो: दक्षता - उभे वर्तेते , सैव सर्वेषां चन्द्रशेखर इव भवति।"

जीवने तु शिक्षा भवेदेव परन्तु सापि कीदृशी भवेदिति पृष्टे सति वयं भारतीया: स्म: तदर्थं धार्मिकी एव भवतु। पक्षेऽस्मिन् भारतीयशिक्षादार्शनिकै: स्वामीविवेकानन्दै: उक्तमस्ति यत् -

धर्म: अस्माकं शिक्षाया: अभिन्नमंगं भवेत् । अयमेव जीवने सुदिग्, विकासस्य दिक् तथा च सम्पूर्णं भारतवर्षं सुमार्गं नयति । धर्मं विना भारतीयशिक्षा 'भारतीयाशिक्षा' नैव भवितुमर्हति इति ।

अत: कथनतात्पर्यं तावदेवास्ति, शिक्षका: सुसमाजायोत्तमनागरिकाय च छात्रान् शीलवान्, गुणवान्, प्रतिभावाञ्च निर्मेयु: । यतो हि यत्र मूल्यं तत्रैव धर्म: सत्यं तेजो बलञ्च निवसन्ति । अत: जगति शीलवतां मूल्यवतां वा न किञ्चिदसाध्यम् । सर्वेषां गुणानामाधार: शीलं मूल्यं वा वर्तते । मूल्येन शीलेन वा त्रिलोकमपि जेतुं शक्यते । यथोक्तं महाभारते -

शीलेन हि त्रयो लोका: शक्या जेतुं न संशय: ।

न हि किञ्चिदसाध्यं वै लोके शीलवतां भवेत् ॥

अत: छात्रेभ्य: गुरुरेव ब्रह्मा, गुरुरेव विष्णु: , गुरुरेव महेश्वर:, गुरुरेव पितरौ वर्तेते इति भावनयैवोच्यते यथा - ' गुरोराज्ञाविचारणीया ' इति ।

****

## स्त्रीशिक्षा अनिवार्या

**रामचन्द्र भट्टः**

शिक्षाशास्त्रीप्रथमवर्षम्

अनुक्रमाङ्क: - 836

जगति अस्माकं समाजः न केवलं पुरुषाणां, किन्तु नारीणामपि अस्ति । अतः सुसंस्कृते समाजे पुरुषाणां तथा स्त्रीणामपि शिक्षा आवश्यकी अस्ति। समाजे स्त्रीणां स्थानं समानरूपेणास्ति । समाजे संसाररथस्य द्वे चक्रे स्तः । नरः च नारी च। उभयोः अपि समानं

महत्त्वम्। नारीं विना नरः संसाररथं चालयितुं न समर्थः । नरं विना नारी अपूर्णा तथा नारीं विना नरोऽपि अपूर्णः। यथा एकेन चक्रेण रथस्य गतिः असंभवा, तथा जीवनस्य गति नार्या विना असंभवा। अतः स्त्रीशिक्षा अतीवावश्यकी।

प्राचीनकालेऽपि स्त्रीशिक्षा अनिवार्या आसीत्। वैदिककाले नार्यः अधिकशिक्षिताः आसन्। गार्गी मैत्रेयी आद्याः विदुष्यः वेदशास्त्रार्थनिपुणाः आसन्। आधुनिककाले स्त्रियः शिक्षणमनिवार्यम्। यदि माता सुशिक्षिता भवेत् तर्हि सा स्वपुत्राणां पालनं शिक्षणं च सुचारुरूपेण कर्तुं शक्नोति । यदि सा अशिक्षिता, तर्हि तस्याः सन्ततिरपि विद्याहीना, संस्कारहीनाच भविष्यति। शिक्षिता नारी अधिका योग्या गृहकार्यसंचालने समर्था भवति । कन्नडभाषायामस्ति एवम् उक्तिः -

ನಾರಿಯೊಂದು ಕಲಿತರೆ ಶಾಲೆಯೊಂದು ತೆರೆದಂತೆ

परिवारे गृहिण्य: स्थानं सर्वोच्चमस्ति । सा एव परिवारस्य सर्वेषां सदस्यानां चिन्तां करोति। सा अर्थार्जनमपि करोति, गृहकार्यमपि करोति । नारी पत्नीरूपेण, मातारूपेण, भगिनीरूपेण सर्वेषां कर्तव्यानां पालनं करोति। यस्मिन् गृहे नारी न भवति, तद्गृहं गृहं न भासते। नारी एव स्वकष्टान् विस्मृत्य सर्वेषां सुखाय अहर्निशं प्रयतते। नारी त्यागस्य मूर्तिः अस्ति । यथा नारी स्वपरिवारस्य हितं वाञ्छति तथा समाजस्य अपि विकासम्, कल्याणम् इच्छति।

अद्य एकमपि क्षेत्रं नास्ति, यत्र नार्या: प्रभावः नास्ति । अधुना सा बहुविधेषु क्षेत्रेषु अग्रसरा अस्ति । विद्यालयेषु, महाविद्यालयेषु, कार्यालयेषु, सर्वत्र नार्यः कार्यरताः सन्ति । किंबहुना अनेकाः नार्यः संसदसदस्याः सन्ति। नगरपालिकासु, विधानसभासु, लोकसभासु अपि सदस्याः सन्ति, ताः सुचारुरूपेण कार्यं कुर्वत्यपि । श्रीमती इन्दिरागाँधी महोदया अस्माकं देशस्य प्रधानमंत्रिपदम् अलंकृता। श्रीमती प्रतिभा पाटील महोदयाऽपि राष्ट्रपतिपदम्

आरूढवती आसीत् । एवं क्रीडाक्षेत्रे, सांस्कृतिकक्षेत्रेऽपि बह्व्यः स्त्रियः देशस्य कीर्तिं प्रसारितवत्यः दृश्यन्ते ।

कुलस्य तथा समाजस्य उन्नत्यर्थं स्त्रीशिक्षा अनिवार्या खलु। यत: शिक्षिता नारी न केवलं स्वजीवनं सफलीकरोति, किन्तु सा परिवारस्य राष्ट्रस्यापि अभ्युदयं करोति । सुशिक्षिता नारी सर्वत्र पूज्यते। अथैव संस्कृते उचितमिदं कथितम् -

यत्र नार्यस्तु पूज्यन्तेरमन्ते तत्र देवताः ।

यत्रैतास्तु न पूज्यन्ते सर्वास्तस्त्राफलाः क्रियाः ।।

सर्वै: नारीणाम् आदरः करणीयः । अस्माकं भारतदेशे तु नारीणां स्वरूपं मातृपदेन गौरवान्वितम् अस्ति । नारी एव समर्थपुरुषस्य जननी अस्ति । नारीं विना अयं समाज: अपूर्णः भवति । अत एव नारी सम्मानः आवश्यकः अस्ति । तदर्थं स्त्रीशिक्षणम् आवश्यकम् ।

****

## शिक्षायाः अर्थः परिभाषा च

**शिवप्रसाद केशन्**
शिक्षाशास्त्रीप्रथमवर्षम्
अनुक्रमाङ्क:-838

संस्कृतभाषायां शिक्षा इति पदस्य व्युत्पत्तिः **शिक्ष्** विद्योपादाने इति धातोः **गुरोश्च हलः** इति पाणिनिसूत्रेण अ प्रत्यये सति निष्पन्ना भवति। अस्यार्थो भवति विद्याग्रहणम् इति । शिक्षा मोक्षस्य साधनं भवति ।

ज्ञानं हि मनुष्याणां तृतीयं नेत्रं मन्यते । “शिक्षयति या सा शिक्षा” “शक्तुं शक्तो भवितुमिच्छा शिक्षा” इति च द्वे व्युत्पत्ती शिक्षाशब्दस्य वर्तते। शब्दोऽयं योगरूढः।“ शिक्षयति या सा शिक्षा” इति योगशक्ते आश्रयेण यस्य कस्यपि विषयस्य ग्रन्थः शिक्षाशब्देन व्यवह्रीयते ।

साम्प्रतिके युगे शिक्षायाः यत् पदं प्रचलितं भवति, तत् तु आङ्लभाषायाः “एज्युकेशन्” education इति,लैटिन् भाषायाः “E” इत्यर्थकस्य “ अन्तः”( Internal) DUCO पदस्य “बहिरानयनं” (out of) इति च पदाभ्यां निष्पन्नं भवति। एवं प्रकारेण “एज्युकेशन् ’ इति पदार्थो भवति।

**शिक्षायाः काश्चन परिभाषा :**

- शरीरात्मनो पूर्णता प्रदानमेव शिक्षायाः कार्यं वर्तते प्लेटोमहोदय:।
- स्वस्थे शरीरे स्वस्थमस्तिष्कस्य निर्मितिरेव शिक्षा वर्तते इति अरस्तु महोदय: ।
- मानवान्तर्निहितशक्तीनां स्वाभविकसुमेलितप्रकत्याधारितः विकास एव शिक्षा भवति इति पेस्टलजीमहोदय:
- व्यक्तित्वस्य समग्राभिवृद्धिरेव शिक्षा इति टी. पी.नन् महोदय: ।
- शिक्षा नाम व्यक्तेः पूर्णतायाः विकासो वर्तते यदर्थं सः सुयोग्यो वर्तते इति कान्ट् महोदय:।

**भारतीदार्शनिकानां मतानुसारेण शिक्षायाः परिभाषाः**

- शिक्षा मानवे निहितदैवीपूर्णतायाः अभिव्यक्तिः भवति इति स्वामि विवेकानन्दमहोदय:।
- शिक्षायाः अर्थः राष्ट्रियतायाः अभिव्यक्तिः भवति इति कौटिल्यःमहोदय: ।
- शिक्षा नाम व्यक्तेः समाजस्य च निर्मात्री स्यात् इति सर्वपल्ली राधाकृष्णमहोदय:।
- बालके मनुष्ये शारिरिकमानसिक-आध्यात्मिकशक्तीनाम् सर्वाङ्गीणविकासः एव शिक्षा इति महात्मागान्धीमहोदय: ।

➢ अस्माकं जीवनस्य सर्वासामपि समस्यानां समाधानार्थं विद्यमानः राजपन्था एव शिक्षा भवति इति रवीण्द्रनाथ ट्यागोर् महोदय:।

****

## फ्राएड महोदयस्य चिकित्सा

**रोझी बञ्चोर्**

शिक्षाशास्त्रीप्रथमवर्षम्

अनुक्रमाङ्क:- 841

वयं यथा आस्मः तथैव दृष्टेः जगदिदं पश्यामः । कस्यापि वाक्यग्रहणे खेदः भवति । सर्वदा चिन्तयामः अहं एव सम्यक् सत्यं वा इति । अन्यत् सर्वं मिथ्या । यथा- "जगत सत्यं ब्रह्म मिथ्या" । तथैव अहं स्थाने – "अहं सत्यं सर्वं मिथ्या" । एतादृशी सर्वेषां चिन्ता । न कोपि भिन्नः ।

अस्मिन् विषये गुरू युजिके उक्तवान्-

एकदा एकां व्यक्तिं नीत्वा तस्य परिवार जनाः विशिष्टः मनस्तत्ववित् सिगमण्ड फ्रएड् समिपे गतवन् तः। परिवारवर्गस्य कथनानुसारं सा व्यक्तिः "अहं मृता" इति सर्वदा चिन्तयति । यः कोपि वदति भवान् जीवितः, मृतः न इति । तथापि कस्यापि कथने न विश्वसिति ।

तदानीं फ्रएड् महोदयः तस्याः व्यक्तेः चिकित्सां प्रारब्धवान् । पुनः परिवार-सदस्यानां कृते उक्तवान् – भवन्तः एतादृशीं व्यवस्थां कुर्वन्तु यथा एषा व्यक्ति प्रतिदिनं दर्पणस्य समीपे स्थित्वा वदति यत् – "मृतव्यक्तिशरीरे रक्तं न भवति" इति । एतद् कृत्वा मासत्रयात् परं पुनः

मत् समीपे आनयन्तु।  तथैव व्यवस्था कृता परिवारीयजनैः। सा व्यक्तिः प्रतिदिनं दर्पणस्य समीपे वदति -मृतव्यक्तिशरीरे रक्तं न भवति। अनन्तरं मासत्रयात् परं पुनः फ्रएड् महोदयस्य समीपे आनीतवन्तः । फ्रएड् तस्य हस्तं धृत्वा अङ्गुल्यां एकया छुरीकया किञ्चित् कर्तनं करोति । अङ्गुल्यां रक्तम् आगच्छति । फ्रएड् तदानीम् उक्तवान्- पश्यतु तव शरीरे रक्तं अस्ति । एतदर्थं किम् ? तदानीं सा व्यक्तिः बहु आनन्देन वदति - एतदर्थं भवति- “मृतव्यक्तिशरीरे अपि रक्तं भवति” । तत्क्षणे युजिके महोदय उक्तवान्- अस्माकं मध्येपि मानसिक-रोगीवत्किञ्चिदस्ति, यत् सर्वदा अस्माकं मनसि भवति, तदेव वाक्यं सत्यं इति चिन्तयामः।

पुनः अन्तिमे उक्तम् - यदि व्यक्तिः स्वयम् अहं दुष्टः इति न स्वकरोति, तस्याः पराजयं कर्त्तुं न शक्नुमः।

****

## शिक्षा एकः जीवनस्य आधारः

द्वितीकृष्ण पाणीग्राही
शिक्षाशास्त्रीप्रथमवर्षम्
अनुक्रमाङ्कः- 843

प्रपञ्चेस्मिन् मानवैः प्रचाल्यमानव्यवहारजीविका निर्वहणं कर्त्तुं शिक्षायाः मार्गं आश्रियन्ते। यतोहि व्यावहारिककौशलव्यापारान् शिक्षा एव तस्य नियन्त्रणं करोति अपि च तस्य जीवने अपूर्वान्दं जनयति। मानवः समाजस्तरे स्वस्य जीविका स्वातन्त्र्य रूपेण निर्वहणं कर्तुम् इच्छति स्म येन असकृत् परिश्रमं सम्पाद्य साफल्यता सक्रियात्मक शिक्षा माध्यमेन प्राप्नोति।

शिक्षा मानवस्य नित्य व्यवहार-जीविकायां नीति एवं प्रीति उभाभ्यां सामञ्जस्य साधनं महत्वपूर्ण व्यावहारिकक्षेत्र भूमिका वर्तते येन मानवः समाजे सर्वेषां व्यक्तीनां सह सम्वन्धं स्थापयति । जीवने अभावपूर्ण कार्याणां परिपूरयितुं शिक्षायाः साहायं आश्रयं वाञ्छन्ति ।

परिवार एवं समाजस्य सर्वाङ्गिणविकासाय मानवस्य एकः भूमिका वर्तते । तत्रापि मानवेषु नैपुण्यं कार्यक्षमतायाः विभिन्नरूपेण दृश्यते। यथा -

मानुष्ये सति दुर्लभा पुरुषता पुंस्त्वे ततो विप्रता
विप्रत्वे वहु विद्यता पुनरता विद्यावतोर्थज्ञता।
अर्थज्ञस्य विचित्र वाक्य पटुता तत्रापि लोकज्ञता
लोकज्ञस्य समस्त शास्त्र विदुषो धर्ममति-र्दुर्लभा॥

( प्रसङ्गाभरणम्)

मानवः जन्मभूते सति , तस्य पौरुषत्वं प्राप्तुं ततोधिक दुर्लभं भवति , पौरुषत्व प्रप्ते सति तस्य विप्रत्वं प्राप्तुं ततोधिक दुर्लभं भवति। विप्रत्वं प्राप्ते सति वहूनां विद्यासु पारङ्गमः ततोधिक दुर्लभं भवति , विद्यावत्वे सति अर्थज्ञः भवितुं दुष्करः भवति , अर्थज्ञः स्थिते सति विचित्र कथा वाचक कौशलान् प्राप्तुं दुर्लभ भवति, विचित्र वाक कौशल स्थिते सति समाजे तस्य परिचयं दुर्लभं भवति।

इह चराचरजगत्यस्मिन् मानवाः शिक्षायाः सर्वविधः स्थले सफलाः भवन्ति चेदपि तत्रापि दुर्लभं त्रयं दृश्यते। ते च यथा -

दुर्लभास्त्रयमेवैतद्दैवानुग्रह हैतुकम्।
मनुष्यत्वं मुमुक्षुत्वं महापुरुष संश्रयः॥

अतः एवमुच्यते जीवनस्य सफलता देवतानाम् अनुग्रह कारणादेव मानवाः मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रयात् सफलता प्राप्नुवन्ति अपि च मानवेषु जन्मजातशक्ति पुनश्च

परिवारस्य आनुवांशिकप्रभावेण स्वप्रतिभानुगुणं व्यक्तित्वस्य विकासः भवति। स्वस्य समाजे सांस्कृतिकनित्यनैमित्तिककर्मादिकं कृत्वा मानवाः जीवने सफलतां प्राप्नुवन्ति।

****

## शिक्षामनोविज्ञानस्य आवश्यकता

**उमाकान्त जोशी**
शिक्षाशास्त्रीप्रथमवर्षम्
अनुक्रमाङ्कः - 844

शिक्षामनोविज्ञानं मनोविज्ञानस्य एका शाखा वर्तते । शिक्षामनोविज्ञानं नाम शिक्षासम्बद्धं मनोविज्ञानम् इति। शिक्षणक्षेत्रे शिक्षामनोविज्ञानस्य आवश्यकता का ? इति प्रश्ने सति, आधुनिके युगे शिक्षामनोविज्ञानस्य बह्वयः आवश्यकताः समाजेस्मिन् समुपलभ्यन्ते इति वक्तुं वयं पारयामः। तासाम् आवश्यक्तानां विषये एव अत्र लेखेस्मिन् किञ्चित् विवृणोमि।

सर्वेष्वपि बालकेषु जन्मतः काश्चित् शारीरिकमानसिकशक्तयः भवन्त्येव । कोऽपि बालकः वंशानुक्रमेण तथा प्रारम्भिकवातावरणेन प्राप्तशक्तिभिः सह समाजे सामञ्जस्यं स्थापयितुं न प्रभवति एतन्निमित्तं समाजे शिक्षाव्यवस्था प्रकल्पिता वर्तते ।साम्प्रतिके काले सर्वत्रापि औपचारिकीशिक्षायाः मूलकेंद्रमस्ति विद्यालयः । विद्यालये शिक्षकस्य कृते शिक्षामनोविज्ञानस्य आवश्यकता बहुत्र भवत्येव यथा सर्वप्रथमं विद्यालये छात्राणां कृते अध्ययनानुकूल वातावरणं निर्मातुं तदनन्तरं बालकानां शारीरिकमानसिकसांवेगिक विकासमाश्रित्य उत्तमपाठ्यक्रमस्य निर्माणार्थम् अद्यत्वे शिक्षाया: कार्यं न तु पुराकालवत् ज्ञानाभिवृद्धि: एव अस्ति अतः पाठ्यक्रमम् एतादृशमावश्यकं भवति येन छात्राणां ज्ञानाभिवृद्धिना सह शारीरिकविकासः नैतिकविकास: सांवेगिकविकास: इत्यादि अपेक्षितविकासा: अपि भवेयुः । एतदतिरिच्य मुख्यरूपेण बालकेषु भिन्नभिन्नावस्थासु

रुचिपरिवर्तनानि व्यवहारपरिवर्तनानि जायन्ते । व्यवहारपरिवर्तनं ज्ञात्वा छात्रानुकूल सामञ्जस्यं स्थापयितुं शिक्षकाय शिक्षामनोविज्ञानम् आवश्यकम् । एवमेव एकस्यां कक्षायां सर्वेरपि छात्राः समानाः न भवन्ति नाम वैयक्तिकविभिन्नता भवति यथा केचित् छात्राः मन्दमतयः केचित् तीक्ष्णमतयः केचित् विकलाङ्गाः केचित् उद्दण्डाः केचित् शान्तस्वभावा: अतः अत्र शिक्षकस्य कृते आवश्यकं भवति वैयक्तिकविभिन्नतां ज्ञात्वा सर्वेषां छात्राणामनुकूलविधिना अध्यापनं येन छात्रेषु वैमनस्यभावना न स्यात् कक्षायां समानतायाः निर्माणं भवेत् न तु असमानतायाः तथा च सर्वेषां छात्राणामध्ययनं प्रति रूचि जागृता भवेत् । कश्चित् अपि बालकः स्व न्यूनतायाः कारणेन अध्ययनम् प्रति विमुखं न भवेत् । कक्षायां छात्रस्य गतिविधिं दृष्ट्वा अध्य्यनस्य कृते छात्राय कापि समस्या अस्ति चेद् तां समस्यां ज्ञापितुम् अपि शिक्षामनोविज्ञानं शिक्षकस्य कृते आवश्यकम् । एवमेव छात्रैः सह कीदृशं व्यवहारं अध्यापकस्य भवेत् यतो हि छात्राः अध्यापकमेव अनुसरन्ति एतद् ज्ञानमपि शिक्षामनोविज्ञानमेव शिक्षकाय प्रयच्छति । अतः उत्तमः शिक्षकः भवितुं शिक्षामनोविज्ञानस्य ज्ञानं अपेक्षतैव ।

****

## शास्त्रस्य प्रयोजनम्

**ममता पधान**

शिक्षाशास्त्री द्वितीयवर्षम्

अनुक्रमाङ्कः - 903

शास्त्रम् इति पदं “ शास् अनुशिष्टौ “ इति धातोः सर्वधातुभ्यः ष्ट्रन् इति सूत्रेण निष्पन्नः भवति । यस्यार्थः भवति अनुशासनम् इति । अस्मान् शासयति पालयति अनुशासने शासनं

करोति तदेव शास्त्रमिति अभिधीयते । शास्त्रमिति पदस्य आङ्ग्लपदम् अस्ति **Logy** इति । यस्यार्थः भवति **Science** इति ।

**शास्त्रस्यलक्षणम्**

प्रवृत्तिश्च निवृत्तिश्च पुंसां येनोपदिश्यते ।

तद्धर्माश्चोपदिश्यन्ते शास्त्रं शात्रविदो विदुः ॥

अर्थात् प्रवृत्तिः निवृत्तिः धर्मपरकं भवति शास्त्रम् इति विद्वद्भिः उक्तम् । उच्यते "**प्रयोजनमुद्दिश्यनमन्दोपिप्रवर्तते** । अर्थात् विना प्रयोजनं कोऽपि किमपि न करोति । प्रत्येककार्यकरणाय किमपि उद्देश्यं प्रयोजनं वा निहितं वर्तते एव । अतः शास्त्राध्ययनस्यापि नैकानि प्रयोजनानि वर्तन्ते ।

**प्रयोजनानि** –

- हितानुशासनपूर्वकग्रन्थविषेशः एव शास्त्रम् । अतः शास्त्राध्ययनस्य बहूनि प्रयोजनानि सन्ति । शास्त्रम् अध्येतृणां अध्यापकादीनां समाजस्य राष्ट्रस्य च हितसाधनं करोति ।
- आत्मानुशासनस्य विषये ज्ञानं प्रददाति शास्त्रम् । शास्त्राध्ययनं कृत्वा अनुशासिताः भवन्ति सर्वे । यतोहि तत्र (शास्त्रे) कथं जीवने दानदया शीलनम्रतादिगुणैः अनुशासिताः भवेम तस्मिन् विषये वर्णितमस्ति । अनेन जनेषु नैतिकगुणानामपि विकासः जायते ।
- संस्कृतिपरम्पराणां विषये शास्त्रे उल्लिखितं वर्तते । तस्य पठने अस्माकं भारतीय हिन्दुपरम्परा पुनश्च सनातनपरम्परायाः विषये अवश्यमेव ज्ञानं भवति । यथा धर्मशास्त्रे

अस्माकं जीवनस्य षोडशसंस्काराणां विषये वर्णितमस्ति। अतः संस्कृतेः परम्परायाः संरक्षणार्थं शास्त्रपठनस्य अवश्यकता अस्ति।

- शास्त्राणां पठनेन मनुष्याणां चारित्रिकविकासःसम्भवति । सम्पूर्णजीवने चारित्र्यमेव मूलं भवति। मनुस्मृत्यादि पठनेन कथां चारित्र्यस्य निर्माणं कुर्मः तस्मिन् विषये ज्ञातुं शक्यते।
- एकाग्रता वर्धनाय शास्त्रस्य प्रयोजनं वर्तते एव । योगशास्त्रे कथितमस्ति यत् चित्तवृत्तिनिरोधः योगः । अतः योगकरणेन मनसि एकाग्रता आयाति। शास्त्रपठनेन अस्माकं मूल्यबोधः,शिक्षायाः गुणवत्ता च सिद्ध्यति।

वेदाध्ययनस्य प्रमुखोद्देश्यं वर्तते चतुर्वर्गफलप्राप्तिः अर्थात् शास्त्राणां पठनेन धर्मार्थकाममोक्षाणां प्राप्तिः भवति । अतः अवश्यमेव शास्त्रस्य अध्ययनं कर्तव्यम्।

****

## शिक्षणव्यूहः

**हीरामणि महान्त**
शिक्षाशास्त्री द्वितीयवर्षम्
अनुक्रमाङ्कः - 908

शिक्षणमेका सुव्यवस्थिता प्रक्रिया अस्ति । छात्राणां व्यवहारे अपेक्षितं परिवर्तनमानयनमेव शिक्षणस्य मुख्यमुद्देश्यं भवति। तत् महदुद्देश्यं प्राप्तुं मनोवैज्ञानिकाधारेण शिक्षणे अनेकानां विधीनां प्रविधीनां च प्रयोगः क्रियते। शिक्षणविधीनां सम्बन्धः प्रत्यक्षरुपेण शिक्षणस्य उद्देश्यैः सह भवति। अतः शिक्षणस्य विधयः शिक्षणस्य दिशं गतिञ्च निर्धारयन्ति। परन्तु शिक्षणस्य प्रविधीनां सम्बन्धः अप्रत्यक्षरुपेण शिक्षणस्य उद्देश्यै: सह भवति। शिक्षणं

रोचकं प्रभावपूर्णं च कर्तुं दृश्य- श्रव्यसाधनानां प्रयोगोऽपि क्रियते। एतैः शिक्षणस्य कार्यं सरलं न भवितुमर्हति। प्रभावशालि शिक्षण माध्यमेन अधिगमस्य अनुभवः कथं प्राप्नुयदिति एतदर्थं शैक्षिक प्रविधिशास्त्रेण कश्चन प्रयासः कृतः वर्तते। शिक्षणस्य क्रियाः पाठ्यवस्तुनः प्रकृतिः, शिक्षणस्योद्देश्यम् , अधिगमस्य प्रकारः, छात्राणामभिरुचिः योग्यताश्च, छात्राणां पूर्वव्यवहारः, तेषामायुः इत्यादीनामुपरि आश्रिताः भवन्ति। शिक्षणव्यूहः भिन्नानां शिक्षणयुक्तीनां साहाय्येन शिक्षणोद्देश्यप्राप्त्यर्थं शिक्षणप्रक्रियां दृढीकरोति।

**शिक्षणव्यूहस्य प्रकाराः ( Types of Teaching Strategy )**

शिक्षणव्यूहः द्विधा विभज्यते

१. प्रभुत्ववादिशिक्षणव्यूहः
२. जनतान्त्रिकशिक्षणव्यूहः

**शिक्षणव्यूहस्य वैशिष्ट्यानि ( Characteristics of Teaching Strategy )**

I. शिक्षणव्यूहस्य क्षेत्रमत्यन्तं व्यापकं भवति।
II. शिक्षणव्यूहे शिक्षणविधयः, प्रविधयः, युक्तयश्च सम्मिलिताः भवन्ति।
III. शिक्षणव्यूहस्य प्रमुखं कार्यं भवति व्यवहार परिवर्तनम्।
IV. शिक्षणव्यूहः किमपि शिक्षण प्रतिमानं प्रति सङ्केतयति।
V. शिक्षणव्यूहस्य शिक्षणोद्देश्यैः सह सम्बन्धः भवति।
VI. शिक्षणव्यूहस्य पूर्वनिर्धारणमेव शिक्षकस्य कार्यकुशलतां वर्धयति।
VII. शिक्षणव्यूहः पूर्वशिक्षण नियोजनस्य कलास्ति।
VIII. शिक्षणव्यूहः शिक्षणप्रक्रियाया वैज्ञानिकाधारं प्रददाति।
IX. शिक्षणव्यूहस्य चयनं शैक्षिकोद्देश्यस्य आधारेण क्रियते यतो हि शिक्षणविधीनां चयनं पाठ्यवस्तुनः प्रकृत्याधारेण भवति।

परम्परागतशिक्षणे पाठ्यवस्तुनः प्रस्तुतीकरणमेव महत्वपूर्णं भवति । परन्तु स्वामित्वाधिगमस्य व्यूहे छात्राणां दौर्बल्यं, स्वामिस्तरं च प्रति ध्यानं दीयते । मन्दबुद्धि छात्राणां कृते एतादृशी सुविधा, अतिरिक्त समयश्च न दीयते येन तेषां काठिन्यं दूरीभवेत् । स्वामित्वाधिगमे काठिन्यं दूरीकर्तुं पुनः शिक्षणस्य, उपचारात्मकानुदेशनस्य, अनुवर्गशिक्षणस्य च उपयोगः क्रियते।

****

## आदर्शशिक्षकः

**रजनीगन्धा साहु**
शिक्षाशास्त्रीद्वितीयवर्षम्
अनुक्रमाङ्कः - 912

" क्षणे क्षणे यत्रवतामुपैति तदेव रुपं खलु शिक्षकस्य "

निखिलभूवने न कोऽपि नरः वुद्यते, यः गुरुं न नमति। संसारेऽस्मिन् विद्यमानः " गुरुः " इति शब्दः अतीव दुर्लभः यद्यपि गुरुः इति अतीवलघुकाय शब्दः तथापि सः महान् तात्पर्यमवहति । अद्यतन समाजे " गुरुः " शिक्षकः, अध्यापकः, आचार्य इति नामभिः अभिधीयते । येषां पार्श्वे विद्यायाः वारिधिः पुष्पसदृशं शोभते । तं वुद्यामपार्जयितुं छात्रः तृषार्तवत् शिक्षकस्य शरणं गच्छति । शरणागतस्सन् छात्रः सर्वदा शिक्षकस्य सुव्यवहारं सुसम्बन्धस्थापनं मधुरवाचं पश्यति । एतदृशं व्यवहारं दृष्ट्वा छात्रः तं शिक्षकम् आदर्शशिक्षकरुपेण आमनति। अतः कालिदसेन उक्तं यत् –

" श्लिष्टाक्रिया कस्यचिदात्मसंथा संक्रान्तिरन्यस्यविशेषयुक्ता।

यस्योभयं साधु स शिक्षकाणां धुरी प्रतिष्ठापयितव्यव एव "॥

अत्र छात्रस्य मनसि सैव आदर्शशिक्षकः यः मधुरवचनैः उपदिशति, स्नेहेन पाठयति, उदाहरणैः वोधयति। छात्रेभ्यः न क्रुध्यति, प्रियभाषी भवति, छात्रवत्सलः भवति, छात्रैः साकं मित्रवत् आचरति । इतरदोषकृतं छात्रं दण्डं विना बोधयति च । तस्मात् एतदृशः गुणग्राहिशिक्षकः निस्सन्देहेन सर्वप्रियः, सर्वगुणसम्पन्नः च भवति । अतः छात्राः एतादृशाध्यापकान् स्वादर्शशिक्षकत्वेन स्वीकुर्वन्ति ।

****

## उपयुक्तमूल्याङ्कनोपकरणानां निर्माणे शिक्षकस्य भूमिका

**ज्योतिर्मयी परिडा**

शिक्षाशास्त्री द्वीतीतवर्षम्

अनुक्रमाङ्क: - 914

मूल्यांकनस्य प्रक्रिया एका सतत प्रचल्यमाना सोद्देश्या प्रक्रिया वर्तते । अस्याः मूल्याङ्कनप्रक्रियायाः कानिचन उद्देश्यानि भवन्ति यानि पुरतः संस्थायाध्यापकः मूल्याकनोपकरणानां निर्माणं करोति। मूल्याङ्कनं कस्यापि पाठ्यविन्दोः, पाठ्यविषयस्य तथा पाठ्यक्रमस्य न भवितव्यम् अपितु पाठ्यविन्दूनां पाठ्यक्रमेण पठयवस्तुनः सम्बन्धितानां विषयक्षेत्राणामपि मूल्याङ्कनं भवितव्यम्। तदर्थम् अध्यापकः विषयक्षेत्रसम्बन्धितान् सर्वामपि बिन्दून् आश्रित्य मूल्याङ्कनोपकरणानां निर्माणं कुर्यात् । उपयुक्तमूल्याङ्कनोपकरणानां निर्माणे अध्यापकेषु तावत् परिमितं सामर्थ्यं नागमिष्यति यावत् परिमितम् अध्यापकः छात्राणां निदानस्याधारेण उत अनुदेशनमाध्यमेन छात्राणामुपलब्धेः अध्यायनाधिगमप्रक्रियायाश्च साफल्यार्थं मूल्याङ्कनार्थं प्रयत्नं न कुर्वन्ति।

**विशिष्टविषयसन्दर्भे अध्यापकस्य मूल्यांकनक्षमता-**

अत्र विशिष्टविषयसन्दर्भेषु अध्यापकस्य मूल्यांकनक्षमता तावदावश्यकी वर्तते यावता मूल्यांकितः छात्रस्य जीवने तत् तत् विशिष्ट क्षेत्रेषु आत्मनियोजने समर्थः भवेत् । अर्थात् अध्यापकेन कस्यापि विषय विशेषस्य केवलं मूल्यांकनं न करणीयमपितु विषय सम्बन्धितानां क्षेत्राणामपि मूल्यांकनार्थं प्रयासः करणीयः तदर्थं अध्यापकः स्वयं विषयविशेषज्ञः भवेत् तथा निरन्तर मूल्यांकन प्रक्रियायां सम्बन्धितविषयेन सह सहसम्बन्धिनां विषय क्षेत्रेणामपि समावेशः मूल्याङ्कन प्रक्रियायां कुर्यात् । उदाहरणार्थं यदि कस्यापि बालकस्य मूल्याङ्कनं करणीयं वर्तते चेत् न केवलं पठ्यविषयस्य पाठ्यक्रमस्य वा मूल्याङ्कनं भवेत् । अपितु तस्य तर्कक्षमतायाः, विषयावबोधक्षमतायाः , सृजनात्मकक्षमतायाश्च मूल्याङ्कनमपि भवेत् तादृशस्य परीक्षणस्य निर्माणं करणीयम् ।

**छात्रसन्दर्भितानां मूल्याङ्कनोपकरणानां निर्माणे अध्यापकस्य भूमिका-**

कक्षायाः सर्वे छात्राः समानप्रतिभावन्तः केचन क्षमतावन्तः च न भवन्ति अतः स्थूलरीत्या यदि एतेषां विभाजनं क्रियात् चेत् प्रायः त्रिषुवर्गेषु इमे विभक्ताः भवन्ति केचन प्रतिभावन्तः, केचन पृष्ठस्थाः, अन्ये च सामान्यप्रतिभावन्तः छात्राः भवन्ति । अतः अध्यापकेन तथ्यमिदं ध्येयं यत् तेन सामान्य छात्राणां मूल्याङ्कनमुपयुक्तरीत्या भवेत्, तादृशस्य मूल्याङ्कनोपकारणस्य निर्माणं कराणीयम् । यदि एतादृश्यस्य उपकरणस्य निर्माणं जायते चेत् प्रतिभावन्तः छात्राः आत्मप्रतिभायाः उन्नततमं स्थानं प्रप्नुवन्ति । पृष्ठस्थानश्च सामान्यवत् भवितव्यमिति ध्येयं अग्रे गन्तुं प्रयासं कुर्वन्ति । समान्याश्च इतोऽपि उत्कर्षाय प्रयासं करिष्यन्ति ।

इत्थं विषयक्षेत्रसम्बन्धितानां छात्रहितसम्बन्धितानां परीक्षणानां निर्माणम् अध्यापकः विभिन्न मूल्यङ्कनिपकरणानां सन्दर्भे कर्तुं पारयेत् तादृशः प्रयासः कराणीयः ।

****

# शिक्षणस्य शिक्षकस्य च महत्त्वम्

**जयदेव बारिक**
शिक्षाशास्त्री द्वितीयवर्षम्
अनुक्रमाङ्कः - 916

शिक्षणम् एव मानवतां बोधयति। शिक्षणेन विना मानवजीवनं पशुवदेव। प्राचीने काले अस्माकं देशे गुरुप्रणाल्या शिक्षणं प्रचलति स्म। गुरूणाम् आश्रमाः, गुरुकुलानि, येषु गुरवः छात्रेभ्यः शिक्षणं यच्छन्ति स्म। किन्तु इदानीं जनसङ्ख्यायाः वर्धनात्, पाश्चात्यसंस्कृत्याः प्रभावेण च शिक्षणपद्धतिः परिवर्तिता अस्ति। वर्तमानकाले प्रतिनगरं प्रतिग्रामं शिक्षणप्रदानार्थं शैक्षणिकसंस्थाः सन्ति। तथापि सर्वेभ्यः शिक्षणं न प्राप्यते। शिक्षणाय विद्यालयानां निर्माणं, छात्राणां, भवनानां, शिक्षकाणां च प्रबन्धनं प्रशासनस्य कर्तव्यम्, उत्तरदायित्वं च अस्ति। किन्तु तेषु शिक्षकः प्रमुखः, महत्वपूर्णः च अस्ति। शिक्षकाः चारित्र्य, लोभरहिताः, परोपकारिणः भवन्ति चेत् छात्रान् सम्यक्तया मानवतायाः पाठं पाठयितुं शक्नुवन्ति। प्राचीनकाले सर्वेऽपि गुरवः उपर्युक्तस्वभाववन्तः आसन्। वर्तमानकालः धनप्रधानः अस्ति इत्यतः शिक्षकेभ्यः अपि वेतनस्य अत्यावश्यकता वर्तते। शिक्षक एव प्रत्येकं जनस्य मौलिकजीवनम् अध्यापयति। अतः शिक्षकाणां सम्माननाय शिक्षकदिवसस्य आचरणस्य परम्परा प्रारब्धा।

वर्तमानकाले कोऽपि जनः शिक्षकस्य महत्वं न जानाति। अतः जनान् शिक्षकस्य महत्वं बोधयित्वा शिक्षकेभ्यः सर्वत्र उत्तमस्थानं कल्पनीयम्। शिक्षकाणामपि दायित्वमस्ति यत् तैः आदर्शचरित्रानुसारं समाजस्य मार्गदर्शनं करणीयम्। शिक्षकैः धूम्रपानं, मदिरापानं, अन्यत् दुर्व्यसनं वा न करणीयम्। शिक्षकैः विशेषशिक्षणवर्गाः न चालनीयाः। तैः छात्रेभ्यः विद्यालये एव सम्पूर्णशिक्षणं दातव्यम्। श्रेष्ठशिक्षकाः सदैव सम्मानं प्राप्नुवन्ति।

****

# प्राचीनविज्ञानस्य प्रतिष्ठा

**तोषकुमार साहू**
शिक्षाशास्त्रीद्वितीयवर्षम्
अनुक्रमाङ्क: - 919

एकदा एक: आचार्य: गुरुकुले शिष्यान् भेषजतत्वं शिक्ष्यति स्म। शिक्षासमापनान्ते स शिष्याणां परीक्षार्थम् आदिशत्,"यूयं गत्वा काश्चन गुल्मान् आनयत येषु ओषधगुण: नास्ति इति ।” सर्वे शिष्या: क्तिपयान् गुल्मान् धृत्वा कियत् कालात् परम् आचार्यस्य समीपमागत्य उवाच - “भगवन्, एषु गुल्मेषु नास्ति कोपि औषधगुण: ।” परन्तु एक: शिष्य: रिक्तहस्तेन प्रत्यावर्तत। स: उक्तवान्, मया एकोपि गुल्म: न दृष्ट: यस्मिन् औषधगुण: नस्ति। आचार्य: सन्तुष्ट: भूत्वा तमेव गुरूकुलस्य द्वितीयअचार्यपदे न उक्तवान् । तस्य नाम चरक: । स: विख्यातार्युर्वेदग्रन्थस्य रचयिता । अस्य ग्रन्थस्य नाम चरकसंहिता तेन मानवशरीरे त्रय: धातव: विद्यन्ते इति स्वीकृतम्। ते वात-पित्त-कफ़श्च। त्रयाणां धातुनां तुल्यपरिणामत: शरीरं सुस्थं भवति,वैषम्यात् तु रुग्णं जायते । चरकेण विभिन्नव्याधीनां निदान-चिकित्सा-विषये नानाविधानां गुल्मलतादिनां प्रयोग: निरुपित:। चरकसंहिता अस्माकं प्रथम: चिकित्साग्रन्थ:। तत्रोक्तं वातघ्नं, तक्रं, पित्तघ्नं, घृतं, कफ़घ्नं, मधु इति।

प्रचीनभारतस्य अन्यतम: चिकित्सावित् महर्षि: सुश्रुत: । तस्य ग्रन्थस्य नाम सुश्रुतसंहिता । स: मानवजाते: आदिम: शल्यचिकित्सक: । अग्ङारोपविज्ञानं तस्येव महत् अवदनम्। स एव पतलशल्यचिकित्साया: अग्रेणी आसीत् । सहस्राधिकवर्षेभ्य: प्राक् प्राचीनभारतीयवैद्या: मधुमेहरोगस्य निरकरणाय विम्बबीजयो:, हृद्-रोगनिवारणाय अर्जुनत्वच: पित्ताधरोपलाशाय कुलुत्थस्य, रक्तवेगपीडाशमाय पातालगरुडमूलस्य प्रयोगविषये उपदिष्टवन्त:।

अधुना गणितशास्त्रे दशकीयपद्धते: बहुल प्रयोग: दृश्यते । शून्यसंख्यां विना तस्या: कल्पना न सम्भवति । कश्चित् गणितकानाम् अग्रणी: भारतीय: विद्वान् शून्यसंख्याया: उद्भावनं कृतवान् इति प्रसिद्धि: ।

पश्चात्यविद्वांस: कथयन्ति यत्-सूर्यस्य चतुष्पार्श्वेषु पृथिव्यादि ग्रहा: प्रदक्षिणं कुर्वन्ति । एतस्य तथ्यस्य आविष्कर्त्ता कोपरनिकस् महोदय: । परन्तु एतत् न सत्यम् – तस्मात् बहुपूर्वम् अर्यभट्ट: सूर्यसिद्धान्तग्रन्थस्य गोलाद्धाये एतत् तथ्यम् उल्लिखितवान् ।

भारतीयदर्शनपरम्परा पृथिव्यां प्राचीनतमा । उपनिषद: विश्वस्य आदिदर्शनग्रन्था: इति स्वीक्रियन्ते उपनिषत् विषये पाउलडेसन्-महोदय: अलिखत् –“एषा मम जीवने शान्तिदायिका, मरणे अपि शान्तिदायिका ।”

महर्षिपराशररचिते वृक्षायुर्वेदे पर्णै: क्रियमाणा: विविधा: किया: वर्णिता:, यथा-प्रस्वेदनम्,अग्ङारात्मिकरणम्,आलोकसंश्लेषणम्,श्वासक्रिया च । रेखागणिते य: सिद्धान्त: “पाइथागोरस्” इति नाम्ना विख्यात:, मूलत: स: सिद्धान्त: बोधायनचार्येण शुल्वसूत्रेषु पूर्वमेव निरुपित: । स्वातिमुनि: संग्ङीतशास्त्रस्य सम्यगध्ययनं कृत्वा मृदग्ङ् इति वाद्ययन्त्रं निर्मितवान् । महामुनि: भरत: नाट्यशास्त्रं प्रणीतवान् । पाणिने: अष्टाध्यायी सर्वेषु व्याकरणग्रन्थेषु च श्रेष्ठ ।

पुरा सप्तवर्षिय: सन् छात्र: पञ्चविद्या: अधीतवान् । प्रथमा शब्दविद्या भाषाज्ञानाय, द्वितिया शिल्पविद्या यन्त्रनिर्माणं-ज्योतिषादिशिक्षार्थम् । तृतीया आयुर्विद्या व्याधिनिवारणाय, चतुर्थीहेतुविद्या-सत्यासत्यनिरुपणाय, पञ्चमी अध्यात्मविद्या-जीवनस्य रहस्यज्ञानाय इति । एवं प्राचीना: भारतीया: सङ्गीतशास्त्रे, भौतिक-रसायन-जीवविज्ञाने, आर्युर्वेदे, धनुर्वेदे, भुगोले, खगोले, नक्षत्रविज्ञाने, धातुविज्ञाने, रत्नविज्ञाने, उद्भिदविद्यायां, वास्तुविज्ञाने, पशुविज्ञाने,

शिल्पविज्ञाने, भास्कर्ये, चित्रकलायां, समरविज्ञाने, विमानविज्ञाने च गभीराध्ययनं विरला: सिद्धि: सम्प्राप्तवन्त: । प्राचीनभारतीयविज्ञापरम्परा अतीव उत्कृष्टा । सा सर्वजनहिताय सर्वजनसुखाय च अभिप्रेता।

****

## शिक्षायाः महत्त्वम्

**नीरजपंत:**
शिक्षाशास्त्रीद्वितीयवर्षम्
अनुक्रमाङ्कः - 927

जीवनेन सह देशस्यापि विकासे महत्वमावहति शिक्षा , यतोहि समाजस्य सर्वविधविकासाय शिक्षा एव अन्यतमं साधनं वर्तते । शिक्षायाः महत्त्वं मनसि निधायैव सर्वकारेण षड्वयसारभ्य चतुर्दशवयः यावत्बालेभ्यः अनिवार्यनिःशुल्का च शिक्षा दातव्या इत्ययं नियमः कृतः अस्ति। शिक्षा सर्वेषां जीवने सकारात्मकप्रभावं जनयति, सर्वकारेणैव "सर्वशिक्षा अभियानम्" इत्यादि साक्षरयोजनानां माध्यमेन जनजागरणमपि कृतं तथापि राष्ट्रे अस्मिन् साक्षरतायां असमानता एव दरीदृश्यते। शिक्षां विना जीवनं लक्ष्यरहितं क्लिष्टकरञ्च भवति, लक्ष्यं सफलतानुभवञ्च प्राप्तुम् आत्मविश्वासं सम्पादयति शिक्षा, चिन्तनं कार्यरूपे च परिणमति । दिव्याङ्गनिर्धनजनानां कृते अपि धनिकसामान्यजनानामिव जीवनयापनार्थं वैश्विकविकासप्राप्त्यर्थं वा शिक्षायाः आवश्यकता अस्ति । तथाच तेषां समानाधिकारमपि अस्त्येव । देशस्य विकासः नागरिकाणां वैयक्तिकविकासं विना नैव सम्भवति । शिक्षाप्राप्तिसाधनानि सुगमानि सुलभानि कृत्वैवकश्चितोद्देशः स्वविकासपथे अग्रेगन्तुं शक्नोति अन्यथा असम्भवमेव। समानतासम्पादनार्थं भेदभावांश्च दूरीकर्तुं वा शिक्षा आवश्यकी। शिक्षा व्यक्तये स्वक्षमतायाः अवबोधनाय साहाय्यमाचरति । मानवव्यक्तित्वस्य संघटनम्, शारीरिकमानसिकावस्थायाः उचितविकासः, समाजस्य प्रगतिः, प्रेमाहिंसायाः वर्धनम् एतानि उद्देश्यानि शिक्षायाः सार्वभौमिकतामेव प्रकाशयन्ति । सुष्ठुशिक्षायाः प्रकृतिः रचनात्मिका

भवति, या सर्वदा अस्माकं भविष्यं निर्माति । शिक्षा सर्वेषां मौलिकाधिकार: अपि वर्तत एव । जगति कस्यापि परिवर्तने समाजस्य उत्थाने च सर्वदा सक्षमा शिक्षा । इयम् अधिगमस्य निरन्तरासुरक्षिता च प्रक्रिया अस्ति या आमरणपर्यन्तं चलन्त्येव भवति । यथा दर्पणमवलोक्य मानवः स्वीयं वास्तविकं स्वरूपं वेत्ति तथैव शिक्षया मानवः स्वास्तित्त्वबोधं कर्तुं प्रभवति । शिक्षायाः एव महत्त्वमित्थं वर्णितं केनचित् -

सत्याचारविचारशिक्षणपरा सर्वाङ्गिकीमुन्नतिं

छात्राणां विदधद्विवेकविनयाचारप्रचारैकधीः ।

चारित्र्योन्नतिसाधिका गुणगणै: सारल्यसंसाधिका

लोकेषु प्रचरेत्सुशिष्यजनिदा शिक्षा सदा कामधुक् ॥

शिक्षायाः एव परिभाषा: स्वबुद्धे: स्वानुभवस्यानुसारञ्च अनेकै: भारतीयपाश्चात्यविद्वांसै: प्रदत्ता: सन्ति, तासु परिभाषासु एव अन्यतमाः अधोलिखिताः सन्ति । ताः यथा -

(1) महात्मागांधी - "मानवस्य देहात्ममनो: उत्तमोत्तमस्य सर्वतोमुखेन बहिरानयनमेव शिक्षा"

(2) स्वामिविवेकानन्द: - "मानवान्तर्निहितपरिपूर्णदैवात्मकताभिव्यक्तिरेव शिक्षा"

(3) रवीन्द्रनाथटैगौर - "शिक्षा परमं सत्यं किमिति अन्वेष्टुमस्माकं कृते मार्गं दर्शयति, अनयान्तर्दृष्टि: प्रीतिरिति सम्पद: सम्प्राप्ति: सम्भवति, पुनश्चेयंजीवनस्य महत्त्वं कल्पयति"

(4) अरिस्टॉटल - "स्वस्थशरीरे स्वस्थमनसः निर्माणमेव शिक्षा"

(5) प्लेटो - "सकाले किं दुःखं किं सुखमित्येतयोः परिज्ञानं यया भवति सा शिक्षा"

(6) हर्बर्टस्पेंसर - "परिपूर्णजीवनमेव शिक्षा"

****

# सच्चिक्षा धर्मशिक्षा

**राहुलमिश्रः**
शिक्षाशास्त्रिद्वितीयवर्षम्
अनुक्रमाङ्कः - 929

मन्यत एवं यत् मानवोसावस्तिभगवतो महत्सृष्टिरिति । वर्धमानास्त्यनुदिनं सभ्यता मानवानाम् । युगेन सह समतालेन अग्रेसरोऽस्तिमानवोयम् । सुखस्वाच्छन्द्येन जीवितुम् अभिलषति । तदानुगुण्यम् आधुनिकं भवति रुचिरपि विन्यसति । अधुनातनकाले चिकित्साकृषिमनोरञ्जनगमनागमनादिसर्वस्मिन् क्षेत्रे यथा प्रयुक्तिविद्यायाःप्रगतिः साधिता सा वस्तुतः श्लाघनीया । परन्तु निरङ्कुशतोच्छृङ्खलताभ्रष्टाचारितार्थिकविषमतातङ्कवाद-भेदभावदुर्व्यसनकापट्यचौर्यादीनिसामाजिकवैकल्यानि अद्यावधि समाजे परिदृश्यमानानि सन्ति । आतङ्कवादिभिः क्रियमाणा क्रूरताजराश्रमानाथाश्रमाः आधुनिकसमाजं प्रति उपहसन्ति । एतेषां सामाजिकसमस्यानां मूलं गत्वाद्रक्षामः चेत् प्राप्नुमेतत् प्रभविष्यामः यत् ये आतङ्कम् उपद्रवञ्च कुर्वन्ति भ्रूणहत्यांकुर्वन्ति कापट्यं भ्रष्टाचारितां वा कुर्वन्ति स्वपितरौ जराश्रमं प्रेषयन्ति ते प्रायशः साक्षराः शिक्षिताश्च भवन्ति । परन्तु एतादृशम् अकार्यं कर्तुं कथम् एते प्रभवन्ति इति प्रश्ने सति अस्माकं नयनपथगामि भवति एकमेव कारणं सच्छिक्षायाः अभावः । एषः सच्छिक्षाभावः एव कालान्तरे मनुष्येषु संस्कारहीनतां चरित्रहीनतां च जनयति । इयं सच्छिक्षा धार्मिकशिक्षा मूल्यशिक्षा इत्यादिभिः नामभिः अभिधीयते ।

समाजः अभिभावकाश्च पूर्वापेक्षया आधुनिकाः । एतेभ्यः रोचन्ते पाश्चात्यभाषासभ्यतादयः एव । ऋषीणां त्यागपूर्णचारित्र्यस्य धर्मस्य ऐश्वरीयविश्वासस्य च क्षयः भवन्नस्ति । एतत्सर्वं पाश्चात्यशिक्षायाः पाश्चात्यसभ्यतायाश्च प्रभावः । पाश्चात्यशिक्षा अदेया इति न मतम् । किन्तु विषसेवनम् औषधैः सह अथवा एतैः संस्कृत्य क्रियेत चेत् अमृतफलं

दास्यति । तद्वत् पाश्चात्याधुनिकशिक्षया सह धार्मिकशिक्षापि प्रदातव्या । यतोहि धर्म एव मनुष्यस्य जीवनं प्राणाः इहलोके परलोके च कल्याणकारी।

इदानीमस्माभिः चिन्तनीयं यत् धारणयोग्यः धर्मः कः इति । श्रीमद्भगवद्गीतायां षोडशाध्याये प्रथमद्वितीयतृतीयाश्चश्लोकाः सप्तदशाध्याये चतुर्दशपञ्चदशषोडशाः श्लोकाः धर्मं तपोनाम्ना ज्ञापयन्ति। महर्षिपतञ्जलिरपि यमनियमैः धर्मं बोधयति योगदर्शनस्य द्वितीयपादे। महर्षिमनुनापि उक्तं धर्मलक्षणंयथा -

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।

धीर्विद्यासत्यमक्रोधो दशकं धर्मलक्षणम् ॥(६/९२)

वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।

एतच्चतुर्विधंप्राहुः साक्षाद्धर्मस्यलक्षणम् ॥(२/१२)

एवं रीत्या सद्गुणः सदाचारश्च धर्म इति ऋषिभिः उदितः । सदाचारः नाम शास्त्रानुकूलं सर्वकर्म । एतेन न्यायेन संयमब्रह्मचर्यपालनविद्याभ्यासमातृपितृगुरुभक्तीश्वरभक्तयः शास्त्रविहिताः भवेयुः । सदाचारद्धर्मोत्पत्तिरिति भीष्मः महाभारतस्य आनुशासनिकपर्वणि वक्ति -

सर्वागमानामचारःप्रथमं परिकल्पते।

आचारप्रभवोधर्मो धर्मस्य प्रभुरच्युतः ॥

यःशिष्यः एवङ्क्रमेण सदाचारी सन् अधीते तं देवाः अपि प्रशंसन्ति। यथा -

न तेनवृद्धो भवति येनास्य पलितं शिरः।

या वैयुवाप्यधीयानस्तं देवाः स्थविरं विदुः ॥

दौर्भाग्येण कथ्यते यत् धर्मप्रधानराष्ट्रेऽस्माकं धर्मं ससीमीकृत्य धर्मनिरपेक्षताव्याजेन धर्मशिक्षायाः निराकरणं धार्मिकशिक्षातः बालानां वञ्चनञ्च अनुचिते। प्रार्थनायां पाठ्यचर्यायां चधर्मशिक्षायाः समावेशनं भवेत् । यया धर्मशिक्षया शिक्षिताः शिष्याः देशस्य सञ्चालनंकर्तुं समर्थाः भविष्यन्ति। सद्गुणयुक्ताः सदाचारसम्पन्नाः स्वयमपि सुखेन शान्त्या च मानवजीवनं साफल्यं गमयिष्यन्ति । समाजं देशञ्च प्रगतिपथे नेष्यन्ति । एतदर्थं पाठ्यक्रमनिर्मातृणाम् अध्यापकनाम् अभिभावकानाञ्च दायित्वं प्रामुख्यम् आवहति।

न हायनैर्नपलितैर्न वित्तेन न बन्धुभिः।

ऋषयश्चक्रिरेधर्मं योनूचानः स नो महान्॥

****

## वैदिक काले शिक्षायाः व्यवस्था

**सञ्जय कुमार साहु**

शिक्षाशास्त्रीद्वितीयवर्षम्

अनुक्रमाङ्क: - 932

शिक्षा व्यक्तेः सर्वाङ्गिण विकासाय, सामाजिकराष्ट्रीयप्रगते: तथा च सभ्यता संस्कृतेः निमित्तम् अनिर्वार्या अस्ति। भरतीयाः शिक्षायाः गुढ महत्वं ज्ञातवन्तः । अतः प्रचिनभारते शिक्षायाः सुव्यवस्था आसीत् । प्रचिनशिक्षाप्रणाली विशालम् वैदिकसाहित्यजीवनं अददत्। विश्वे एतादृशः कोऽपि राष्ट्रं नास्ति यस्मिन् ज्ञानं प्रति प्रीति: इतः प्राचिनकालत् अभवत्। प्राचीनशिक्षाप्रणाली ज्ञानस्य विभिन्नः क्षेत्रेषु मौलिकविचारकान् विदुषश्च अजायत।

वेदेषु एतदृशानि अनेकानि उदाहरणानि प्राप्यन्ते यैः वयं ज्ञातुं शक्नुम: यत् सुदूरातीते अपि भारते संगठितरूपेण गुरूभि: शिक्षा दीयते स्म। ऋग्वेदे किञ्चित् संकेतं प्राप्यते येन

पाठशालाया: एव कस्यपि संस्थया: अनुमानं कर्तुं शक्नुमः। छान्दोग्यउपनिषेदि ज्ञानं प्रप्यते यत् बालका: गुरुगृहे वसन्त: विद्याध्ययनं कुर्वन्त: वैदिकसाहित्ये अस्या: वार्त्ताया: उल्लेख: प्राप्यते यत् वैदिकयुगे संघानि, परिषदा: चरणानि, मठानि, गुरुकुलनि तथा च आश्रमा: स्थापितवन्त: । यत्र गुरु: वैयक्तिकरुपेण स्वयमेव शिष्यान् शिक्षां प्राददाति स्म । ग्रामेष्वापि प्राथमिकपाठशाला: आसन्।

सर्वा: शिक्षासंस्था: आसीत् तथा च बाह्य नियन्त्रात् पूर्णतया मुक्तमासीत् । तासु संस्थासु छात्राणां प्रवेश: एकस्मिन् निश्चितवयसि भवति स्म । प्रवेशसमये छात्राणां कृते पठनलेखनगणितस्य च ज्ञानम् आवश्यकमासीत्।

वैदिकयुगे तथा च महभारतकाले वेदः, पुराणं, व्याकरणं, जौतिषं, दर्शनं कला इत्यादिविषयादिणाम् अध्ययनं भवति स्म । अस्मिन् काले श्रमविभाजनं कृत्वा समाजस्य प्रत्येकं व्यक्तिं स्ववर्णानुसारेण शिक्षा दीयते स्म। उदाहरणार्थम् श्रीमद्भगवद्गीताम् उल्लेखितम् अस्ति यत्–

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।

ज्ञानं विज्ञानमस्तिक्यं ब्रह्मकर्म स्वभावजम्॥ १८/४२

शौर्यं तेजो धृतिर्दाक्ष्यं युध्दे चाप्यपलायनम्।

दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्॥ १८/४३

कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम्।

परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्॥ १८/४४

ब्राह्मणानां कृते धर्मकर्म, क्षत्रियाणां कृते युध्दशिक्षा ( सैनिकशिक्षा ) वैश्यानाञ्च कृते वाणीज्यशिक्षा, शूद्रानां कृते च विविधसाधारण कलाः हस्तकार्याणी च शिक्षायाः व्यवस्था आसीत्।

****

## ज्योतिश्शास्त्रम्

**वेङ्कटेश अनन्त हेगडे**
शिक्षाशास्त्रीद्वितीयवर्षम्
अनुक्रमाङ्कः- 934

संसारेऽस्मिन् सर्वेषां प्राणिनामाधिभौतिकाधिदैविकाध्यात्मिकमिति दुःखत्रयं वर्तते । एतेषां दु:खानां निवारणपुरस्सरं चतुर्वर्गफलप्राप्त्यर्थं सफलमार्गदर्शकस्य स्थानमलङ्करोति वेदः । इतिहासाध्ययनात् ज्ञायते यत् भूखण्डे उपलब्धसाहित्येषु सर्वप्राचीनः वेदः । तस्य वेदस्य कर्ता नास्तीति स्वीक्रियते । तदर्थं खलु वेदः अपौरुषेयः इत्युच्यते । स एव सकलज्ञानस्य भण्डारः । यथोक्तं मनुना -स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः । एतस्य वेदस्य षडङ्गानि वर्तन्ते । यथा -

शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः ।
ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु ।।

एतेषु वेदाङ्गेषु ज्योतिषस्य वेदाङ्गत्वं कथमिति पश्यामश्चेद् वेदस्य प्रवृत्तिः यज्ञकर्मसम्पादनार्थम् ,परन्तु यज्ञः कालाधीनः। अस्माकं ज्योतिषशास्त्रं भवति कालबोधकं शास्त्रम्। तदर्थं मुनिभिः शास्त्रमेतत् वेदाङ्गत्वेन गृहितम्। भास्कराचार्येण उक्तं यत् -

वेदास्तावद्यज्ञकर्मप्रवृत्ता यज्ञाः प्रोक्तास्ते तु कालाश्रयेण ।
शास्त्रादस्मात् कालबोधो यतः स्याद्वेदाङ्गत्वं ज्यौतिषस्योक्तमस्मात् ।।

वेदस्य षडङ्गेषु अस्य स्थानं नेत्रत्वेन विद्यते। यथोक्तं भास्करेण –

वेदचक्षुः किलेदं स्मृतं ज्यौतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते ।
संयुतोऽपीतरैः कर्णनासादिभिश्चक्षुषाऽङ्गेन हीनो न किञ्चित्करः ।।

एतादृशेन महिम्ना संयुक्तस्य शास्त्रस्यास्य संज्ञा भेदाश्च कथमिति तत्किञ्चिदत्र विमृश्यते ।

**शास्त्रस्य संज्ञा -**

१ .द्युतेरिसिन्नादेश्च जः इत्युणादिसूत्रेण ज्वलतिकर्मणो द्युतिधातोरिसिन् प्रत्यये दकारस्य च जकारादेशे गुणे ज्योतिः इति शब्दस्य निष्पत्तिर्भवति यस्यार्थः स्वयं प्रकाशितग्रहनक्षत्राणां आकाशीयपिण्डानां वा अववोधनं करोति । एवमाकाशीयपिण्डानां गणितफलितीयविवेचनं यत्र विद्यते तदेव ज्योतिषशास्त्रम् ।

२ .शास्त्राणां पर्यालोचनेन शास्त्रेषु ज्योतिष, ज्यौतिष इति शब्दद्वयस्य प्रयोगो लभ्यते । तत्र ज्योतिः नक्षत्रादयः तान् अधिकृत्य कृतं शास्त्रं ज्यौतिषं, ज्योतिः शब्दात् शेषे )४/४/९२ ( इतिसूत्रेण अणि यस्येति चेति अकारलोपे विभक्तिकार्ये ज्यौतिषम् । अर्शादिभ्यो अच् ) ५/५/१२७ (इति अचि अनुबन्धलोपे यस्येति चेत्यलोपे विभक्तिकार्ये ज्योतिषम् । इत्थम् उभयविधव्युत्पत्या नक्षत्रादीनां ज्ञानकरं शास्त्रं ज्योतिषशास्त्रम् । पुनः निम्नप्रकारेणापि अस्य संज्ञा निरुपयितुं शक्यते । यथा -

- सूर्यकेन्द्रिकः भूकेन्द्रिकः चेति भेदेन ग्रहभ्रमणस्य मतद्वयं विद्यते। यत्राधुनिकाः सूर्यकेन्द्रिकाणां भ्वादिपिण्डानां भ्रमणं स्वीकुर्वन्ति, तत्र प्राचीनाः भूकेन्द्रिकग्रहभ्रमणम् अङ्गीकुर्वन्ति। तत्र भूः स्थिरा इति मत्वा ज्योतिषशास्त्रस्यारम्भः। यतो हि द्रष्टा कुपृष्ठे स्थित्वा एव अपरेषां चलनं परिलक्षति। एवं वक्तुं शक्यते यद्भुवः ध्रुव इव परिकल्पना यस्मिन् शास्त्रे विद्यते, तदेव ज्योतिषशास्त्रम् ।

● ग्रहाः कथं त्रिकालस्य फलसूचनायाः कारणभूताः भवन्ति ? जीव-ग्रहजगतोः कः सम्बन्धः ? ग्रहाणां प्रभावानुरोधेन मानवाः कथं प्रभाविताः ? एवं च सृष्टेः उत्पत्यादिकं कदा सम्भवति ? एवमेव विभिन्नानां प्रश्नानां समाधानार्थं मानवाः यच्छास्त्रमाश्रयन्ति तदेव ज्योतिषशास्त्रम् ।

● **'अहोरात्रम्'** इति शब्दात् '**होरा**' शब्दस्य उत्पत्तिः । अहः दिनं, तस्याधिपः सूर्यः, रात्र्याः अधिपः चन्द्रः । अनयोः उदयास्तव्यवस्थायाः परस्परं वैपरीत्यं विद्यते । एतयोः आधिपत्येनैव अहोरात्रव्यवस्थायाः सर्वाणि कार्याणि प्रचलन्ति । तस्मात् कारणादेव एतौ प्रत्येकं स्थलेषु प्रत्यक्षसाक्षिणौ इति मन्येते। एवमेव प्रत्यक्षरूपेण विद्यमानस्य सूर्यस्य चन्द्रस्य च साक्षित्वं स्वीकृत्य यस्य शास्त्रस्य परिकल्पना विधीयते, तदेव ज्योतिषशास्त्रम् । सूर्यचन्द्रयोः प्रत्यक्षत्वादेव शास्त्रस्यास्य प्रत्यक्षत्वं सिद्धम् । उच्यते -

अप्रत्यक्षाणि शास्त्राणि विवादस्तेषु केवलम् ।
प्रत्यक्षं ज्योतिषं शास्त्रं चन्दार्कौ यत्र साक्षिणौ ॥

● एकेन वाक्येन उच्यते यथा सूर्यादिग्रहार्क्षानदीनां गतिं स्थितिं चाधारीकृत्य कृतं शास्त्रं ज्योतिषशास्त्रम् ।

एतादृशेन महिम्ना परिपूर्णस्यास्य शास्त्रस्यारम्भः किमर्थमिति शंकायां नारदसंहिता समादधति यत् जातकस्य शुभाशुभफलनिरूपणार्थं शास्त्रस्यास्य सृष्टिः ब्रह्मणा कृतेति । तथा चोक्तं -

अभिधेयञ्च जगतः शुभाशुभनिरूपणम् ।
यज्ञाध्ययनसंक्रान्तिग्रहषोडशकर्मणाम् ।
प्रयोजनञ्च विज्ञेयं तत्तत्कालविनिर्णयात् ॥ पुनश्च,
विनैतदखिलं श्रौतस्मार्त्तकर्म न सिध्यति ।
तस्माज्जगद्धितायेदं ब्रह्मणा रचितं पुरा ॥

**शास्त्रस्य स्वरूपम्**

अस्य ज्योतिषशास्त्रस्य सिद्धान्त-संहिता-होरारूपकं स्कन्धत्रयात्मकं स्वरूपम् आचार्यैः प्राचीनकालादेव समुपस्थापितम् । वराहमिहिरकृतबृहत्संहितायां वराहमिहिरेण स्पष्टतया अभाणि यथा -

ज्योतिः शास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितम् ।
तत्कात्स्न्योपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता ॥
स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ ।
होरान्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः ॥

वेदस्य इव ज्योतिषस्यापि जातक-गोल-निमित्त-प्रश्न-मुहूर्त-गणिताख्यानि षडङ्गानि परिलक्ष्यन्ते। यथोक्तम् -

जातकगोलनिमित्तप्रश्नमुहूर्ताख्यगणितनामानि ।
अभिदधतीह षडङ्गान्याचार्याः ज्योतिषे महाशास्त्रे ॥

स्कन्धेन साकम् अङ्गानां समन्वयोऽपि वर्तते। तत् कथं विद्यते इत्यस्मिन् विषये प्रश्नमार्गकारः अवर्णयत् -गणितगोलौ सिद्धान्तान्तर्गतौ, निमित्तं तु संहितायाः, जातकप्रश्नमुहूर्ताः होरास्कन्धस्य विषया इति । पुनश्च केचन ज्योतिषं पञ्चस्कन्धात्मकमिति आमनन्ति । उपर्युक्तभेदत्रयेण साकं केरलिः शकुनश्चेति इतरभेदद्वयं अङ्गीक्रियते । तथा चोक्तम् –

पञ्चस्कन्धमिदं शास्त्रं होरागणितसंहिताः ।
केरलिः शकुनश्चेति ज्योतिः शास्त्रमुदीरितम् ॥

ज्योतिषस्य स्कन्धविभाजनावसरे दृष्टिपथे यद्यपि अस्य बहुभेदाः परिदृश्यन्ते तथापि स्कन्धत्रयमेव प्रामुख्येन स्वीक्रियते । एतेषां संक्षिप्तपरिचयः -

**सिद्धान्तः**

भास्कराचार्येण स्वसिद्धान्तशिरोमणौ अस्य स्कन्धस्य लक्षणं बहुसरलरीत्या प्रतिपादितम्। यत्र गणितेन ग्रहाणां गतिः स्थितिश्च गण्यते, एवं त्रुटिकालादारभ्य प्रलयान्तं यावत् कालस्य परिकल्पना क्रियते स एव सिद्धान्तस्कन्धः । तद्यथा –

त्रुट्यादिप्रलयान्तकालकलना मानप्रभेदः क्रमा-
च्चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः ।
भूधिष्णग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते
सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः ।।

**संहिता**

जनपुष्टिः, जनक्षयः अर्थात् भूकम्पोल्कापातादयः, केतुदर्शनस्य शुभाशुभफलानि, वृष्टिः, धूमकेतुलक्षणं, वास्तुविद्या, दकार्गलः, पिटकलक्षणं, ग्रहचारः, बृक्षायुर्वेदः प्रभृतयः विषयाणां वर्णनं यत्र दृश्यते , स एव संहितास्कन्धः । अमुं विषयमाधारीकृत्य प्रश्नमार्गः वदति -

जनपुष्टिक्षयवृष्टिद्विरदतुरङ्गादिसकलवस्तूनाम्।
केतूल्कादीनां वा लक्षणमुदितं हि संहितास्कन्धे।।

**होरा**

**अहेरात्र** इति शब्दस्यादिवर्णः **अ** एवं अन्त्यवर्णः **त्र**, अनयोः वर्णयोः लोपेन होराशब्दः निष्पद्यते । श्रीकल्याणवर्मकृतसारावल्यामुच्यते यत् –

आद्यन्तवर्णलोपाद्धोराशास्त्रं भवत्यहोरात्रात्।
तत्प्रतिबद्धश्चायं ग्रहभगणश्चिन्त्यते यस्मात् ।।

जन्मकालिकग्रहस्थित्यनुरोधेन जातकस्य सम्पूर्णफलविचारः अस्य प्रमुखविषयः । मानवजीवनस्य सुखदुःखेष्टानिष्टोन्नत्यवन्नतिभाग्योदयादिसमस्तशुभाशुभविषयाणां विचारः

स्कन्धेऽस्मिन् क्रियते। एवमेव वक्तुं शक्यते यत् वैयक्तिकफलविधायकं भवति होराशास्त्रम्। फलितान्तर्गतविषयं स्वीकृत्य नारदपुराणं कथयति यत् -

जातके राशिभेदाश्च ग्रहयोनिर्वियोनिजम्॥
निषेकजन्मारिष्टानि ह्यायुर्दायो दशाक्रमः।
कर्माजीवं चाष्टवर्गो राजयोगाश्च नाभसाः॥
चन्द्रयोगाः प्रव्रज्याख्या राशिशीलं च दृक्फलम्।
ग्रहभावफलं चैवाश्रययोगप्रकीर्णके॥
अनिष्टयोगाः स्त्रीजन्मफलनिर्णयमेव च।

एवमेव प्रकारेण शास्त्रस्यास्य संज्ञा स्वरूपञ्च विचारयितुं शक्यते।

****

# शैक्षिकविचारेषु कालिदासस्य सुमतिः

**आदर्शःके.एस्**
शिक्षाशास्त्रीद्वितीयवर्षम्
अनुक्रमाङ्कः - 939

संस्कृतसाहित्ये मेरुशिखरः इव कालिदासः शोभते। सः प्रकृतिं चुचुम्ब। स्वकृतौ संस्कृतस्य, संस्कृतेः विषये बहुविधविषयान् व्यक्त्यकरोत्। एतेषु शिक्षणमपि एकम्। संस्कृते, साहित्ये, सनातनविद्यासु पुनः मानवतायाः विषये एतस्य निरीक्षणशक्तिः ऊहाशक्तिश्च अमोघम्। तथैव शिक्षणसम्बद्धविचाराः अपि प्रतिभान्ति। उदाहरणार्थं मालविकाग्निमित्रम् इत्याख्ये नाटके गणदासहरदत्तयोः मध्ये वाक्कलहः अभूत्। ततः परम्एतयोः द्वयोः शिश्याभ्यामेव नर्तनं कारयितव्यम् इति निर्णयं स्वीकृतम्। तदानीं निर्णयार्थं अग्निमित्रं पृष्टे सति सः एवम् अवटत् – **“सर्वव्यापीएकाकिनोनिर्णयाप्युपागमोदोषाय” ।** अद्यतन दिनेषु

परीक्षायाः मूल्यमापनसन्दर्भे एकस्यापेक्षया द्वित्राः भवन्ति । नो चेत् एका समितिः भवति । एतादृशीं पद्धतीं कालिदासः पूर्वमेव प्रत्यपीपदत् ।

बालानां शिक्षणविषये रघुवंशकुमारसम्भवशाकुन्तलमालविकाग्निमित्रग्रन्थेषुक्रमेण रघुः, कुमारः पुनश्च भरतस्य शिक्षणसन्दर्भे मनोविज्ञानदृष्ट्या शिक्षणदृष्ट्या च अमूल्यं वाक्कुसुमं प्रददाति । तानि वाक्कुसुमानि –

उवाच धात्र्या प्रथमोदितं वचो ययौ तदीयामवलम्ब्य चाङ्गुलिम् ।

अभूच्च नम्रः प्रणिपातशिक्षया पितुर्मुदं तेन ततान सोऽर्भकः ॥

अस्यार्थः – परिचारिकायाः अङ्गुलीं गृहीत्वा इतस्ततः अटितवान् , सा यथा अवदत् तथैव अनुकृतवान् नम्ररूपेण नमस्कारमपि आरब्धवान् । एवं रघुः पित्रोः हर्षभाक् अभूत् । अत्र कविपुङ्गवः, शालाशिक्षणात् पूर्वं रघोः सामान्यशिक्षणं कीदृशमासीत् इति प्रत्यपीपदत् ।

कुमारसम्भवे –

क्वचित् स्खलद्भिः क्वचिदस्खलद्भिः क्वचित्प्रकम्पैः क्वचिदप्रकम्पैः ।

बालः सलीलाचलनप्रयोगैः तयोर्मुदं वर्धयति स्म पित्रोः ॥

अस्यार्थः – एकदा पतति, एकदा उत्तिष्टति, अपरस्मिन् काले भ्रमन्, यदा कदा समीचीनपादनिक्षेपेण मातापित्रोः हर्षमवर्धत ।

बालाः स्वेच्छायाम् अनिवार्यरूपेण आग्रहं प्रकटयन्ति । यत् पश्यति बालः तत् सः इच्छति , अपेक्षतेऽपि । उदा- शाकुन्तले –“हे सखे ! केवलवाचा अयं तूष्णीकः न भवति गच्छ ! मम उटजे ऋषिकुमारमार्कण्डेयस्य वैविध्यमयः मृदानिर्मितः मयूरः वर्तते । तदानय“ इति प्रथमा तापसि तापस्यन्तरायै अगदत् ।

**“लिपेर्यथावद्ग्रहणेनवाङ्मयंनदीमुखेनैवसमुद्रमाविशत्”** ॥ इति कालिदासः लिपिविषये अचुल्लत् । अस्यार्थः – यथा जलं नद्याः समुद्रं प्राप्नोति तथैव लिपेः ज्ञानात् साहित्यादि वाङ्मयस्य ज्ञानम् उद्बुद्धम्। साहित्य रसास्वादनार्थं लिपिः पुनः ज्ञानस्य अपेक्षा विद्यते।

शिक्षणप्रक्रियायाम् आवृत्तेः अनुकरणस्य च स्थानं विशिष्टमिति अवदत्।

यद्यत्प्रयोगविषये भाविकमुपदिष्यते मया तस्यै।

तत्तद्विशषकरणात्प्रत्युपदिश्यतीच मे बाला॥

अस्यार्थः – मया यद्यत् पाठितं तत्सर्वं सम्यक् अधीत्य मामेव अनुकर्तुम् उपदिशन्ती इव बालेऽयं शोभते। नाम गुरोः यथावत् अनुकुर्यात् नृत्यादौ इति।

एतादृशरीत्य कालिदासः सर्वत्र स्वप्रतिभाम् अभासयत । अत एव कालिदासकृतयः रारज्यन्ते , पौनः पुन्येन पठितुमपि मनः प्रवर्तते , पठनात् पठने नवोल्लसाञ्च प्रयच्छति।

****

## संस्कृताध्ययनं कथं कर्तव्यम्

विनयकुमार् भाग्वत्
शिक्षाशास्त्रीद्वितीयवर्षम्
अनुक्रमाङ्कः - 942

पुरातनकाले तु गुरुकुलपद्धत्या पठन्ति स्म। पौनः पुन्येन पठित्वा, रठित्वा वा ज्ञानस्य अर्जनं कुर्वन्ति स्म। परन्तु अद्यतनकाले एवं नास्त्येव , विविधरीत्या अद्ययनं प्रचलति। यदा परीक्षा समाप्स्यते ततः परं ज्ञानस्य , नाम यत् पठितम् अथवा यत् रठितं तदपि समाप्तिम्

एति । परन्तु एतादृशाद्ययनेन को वा लाभः । संस्कृतक्षेत्रे तु अनेन बहुविधहानिः सेत्स्यति । तर्हि सामान्यरूपेण वार्तालापं कर्तुं किं वा कर्तव्यं संस्कृते-

वयं प्रतिदिनं दूरवाणीम् उपयुञ्ज्महे । तत्र बहुविध नाम वैविध्यपूर्णतन्त्रांशान्(Software) प्रयुञ्ज्महे उदा- What's app इत्यादि ।यदि सख्या सह चाटुकरणसन्दर्भे(Chatting) (वार्तालापः) संस्कृतेन एव भवेत् । मित्रेण सह दूरवाणीमाध्यमेन आलापः प्रचलेत् संस्कृतेन एव । तदा सम्यक् भाषितुं शक्यते । यदि शास्त्रमधीते तथापि सः सुचारुवार्तालापं न जानाति चेत् सः तया भाषया न भाषते इत्येव । अध्ययनस्य फलस्वरूपं वार्तालापेन बहिरायाति ।प्रतिदिनं यदि शक्यते एकस्य नूतनधातोः ज्ञानसम्पादनं कुर्यात् । उदा- वयं 'वद्तु' इत्येव प्रयोगं कुर्महे परन्तु –गद्तु, जपतु, वटतु, लपतु, रपतु, चष्टाम् इत्यादयः धातुरूपाणि एनमर्थमेव प्रतिपादयन्ति । केवलेन एकशस्त्राध्ययनेन किमपि सिध्यति । सामान्यरूपेण संस्कृतनाटकानाम् उत काव्यानां ज्ञानमपेक्षते किमर्थमित्युक्ते आलापे रसः भवेत् पुनः लौकिकवस्तूनां ज्ञानमपि भवेदेव । पूर्वे एव नूतनपदानां ज्ञानं वर्तते तस्य प्रयोगः भाषणे भवेदेव तदा भाषा रुचिकरा भवति। यदि लौकिकवस्तूनां ज्ञानमेव नास्ति तर्हि अन्यया भाषया पदं प्रयुञ्ज्महे , एतदपि असौविध्यमेव अतः इदमिदानीम् आगतानां संस्कृतकादम्बरीणां पठनं कुर्मः चेत् भाषायां सौविध्यं रस्ञ्च उत्पादयितुं शक्यते एव । सामान्यरूपेण संस्कृते वार्तालापं करर्तुम् एतावत् अलम् ।

सर्वदा सरलसंस्कृतम् इति वदामः तर्हि सरलात् कठिनं प्रति कदा गमनम् ?

****

# भारतीयसंविधाने स्त्रीणां शैक्षिकावसरः

**यचिन्द्रकुमारबेहेरा**
शिक्षाशास्त्रीद्वितीयवर्षम्
अनुक्रमाङ्कः - 955

शिक्षिता स्त्री एव शिक्षितसमाजस्य जन्मदात्री। तां विना शिक्षितपुरुषस्य परिकल्पना नैव कर्तुं शक्यते। शिक्षिता स्त्री स्वपरिवारस्य परिपालनं कर्तुं समर्था। एवं विधविचरान् उपस्थापयन् विश्वविद्यालयायोगेन स्त्री शिक्षायाः विकासाय काश्चन संस्तुतयः प्रदत्ताः। ताः यथा -

1.उत्तममातृत्वस्य गृहिणीत्वस्य च निर्माणाय बालिकाभ्यः सुशिक्षा प्रदेया।

2. स्त्रीणां कृते शैक्षिकसौविध्यानां विस्तारः करणियाः।

3.बालिकनां कृते स्वतन्त्रविद्यालयव्यवस्था करणीया।

4.बालिकनां कृते समानपाठ्यक्रमः निर्मातव्यः।

प्रथमपञ्चवार्षिकयोजनायां (१९४९-५६) स्त्रीशिक्षायाः विकासायप्रायसः विहितः। द्वितीयपञ्चवार्षिकयोजनायामपि (१९५६-६१) एतस्याः कृते नैके प्रायसाः कृताः वर्तन्ते। अध्यापिकानां प्रशिक्षणस्य व्यवस्था परिकल्पिता। ग्रामीणक्षेत्रेषु स्त्रीभ्यः निःशुल्कमावासव्यवस्थां प्रदातुं प्रयासः कृतः। बालिकानां शिक्षायाः कृते छात्रवृत्तिः कल्पिता। दुर्गाबाईदेशमुखराष्ट्रियमहिलाशिक्षासमितिः (१९५८-५९) स्त्रीशिक्षायाः विविधसमस्याः समाधानाय स्वाभिमतं प्रकटवती। समित्यानुसारं स्त्रीशिक्षायाः विकासाय राज्यपक्षतः बालिकानां स्त्रीणाञ्च शिक्षापरिषद्विर्मेया। बालकानां बालिकानाञ्च शैक्षिकवैषम्यं दूरिकृत्य उभयेषां शैक्षिकसमानतायाः कृते प्रयत्नः विधेयः। ग्रामिणक्षेत्रेषु स्त्रीशिक्षायाः

अभिवृध्यर्थम् अनुदानव्यवस्था सरलाकरणिया। तासां शैक्षिकव्ययः केन्द्रसर्वकारेण वोढव्यः। बालिकानां बालिकानाञ्च पाठ्यक्रमेभेदः नस्यादिति हंसामेहेतासमितेः (१९६२) अभिमतम्। कोठरी-आयोगेन प्रथमिकमाध्यमिक-उच्चस्तरेषु च स्त्रीशिक्षायाः सम्पुर्णविकासाय निम्नलिखिताः संस्तुतयः प्रस्ताविताः।

१.उच्चप्राथमिकस्तरे बालिकानां कृते पृथग्विद्यालयस्य व्यवस्था करणीया।

२. बालिकानां शैक्षिकस्तरोन्नयनाय निःशुल्कशिक्षाव्यवस्था प्रोत्साहनीया।

३. बालिकानां व्यवसायिकशिक्षायाः कृते अल्पकालिनशिक्षाव्यवस्था स्विकर्तव्या।

४. बालिकानां प्रोत्साहनाय पाठ्यक्रमे गृहविज्ञानं ,सामाजिकविज्ञानादिविषय: समावेशनिया।

५. पूर्वस्नातकस्तरीयबालिकानां कृते पृथक्तया महावाद्यालयाः निर्मेयाः।

राष्ट्रियशिक्षानितौ (१९८६) स्त्रीणांपुरुषैः सहसमानतायै शिक्षाव्यवस्थापरामृष्टा। स्त्रीणां सशक्तिकरणे बलं प्रदत्तम्। शिक्षानीत्यानुसारं वयस्कस्त्रीणां कृते प्रौढशिक्षायाः कार्यक्रमः समायोजनियः। व्यवसायिक-प्राविधिक-वृत्तिकशिक्षाक्षेत्रेषु स्त्रीणां भागग्रहणे वृद्धिः स्यात्। विविधपाठ्यक्रमाणामङ्गत्वेन स्त्री-अध्ययनं प्रोत्साहनीयम्।

आचार्यराममूर्तिसमितिना (१९९०) स्त्रीणां कृते शैक्षिकावसराः कल्पिताः। समित्यानुसारं विद्यालयेषु पोषणस्य, स्वास्थ्यसेवायाः बालविकासस्य विविधकार्यक्रमाणां समावेशः करणीयः। विद्यालयेषु अधिकाधिकतया शिक्षयत्रीणां नियुक्तिः करणिया। बालिकाभ्यः छात्रवृत्तिः निःशुल्कं पुस्तकानि तथा अन्यानि साधनानि प्रदेयानि। स्त्रीशिक्षायाः कृते पृथक्तया व्यवस्था स्यात्। विविधस्तरेषु महिलानुसन्धानक्रेन्द्रणां स्थापना विधेया।

****

# अधिगममूल्याकलनम्

प्रकाश लाक्रा
शिक्षाशास्त्री द्वितीयवर्षम्
अनुक्रमाङ्कः - 945

**मूल्याकलनम्( Assessment)**

मूल्यानाम् आकलनं मूल्याकलनम् इति। शैक्षिकजीवने अस्य मूल्याकलनस्य प्रयोगः विशेषरूपेण क्रियते । इदं हि मूल्याकलनं वार्षिकीपरीक्षायाः पूर्वक्रियाणां अस्ति । अत्र प्रत्येकमपि शैक्षिक गतिविधिनां निरीक्षणं भवति। अनेन मूल्याकलनेन अनेके हि शैक्षिकलाभाः सन्ति। कश्चन अधिगन्ता कियत् अवगच्छति शिक्षकेन स्वशिक्षणे सफलता प्राप्ता अधिगन्तुश्च इतोऽपि कः परिष्कारः अपेक्षितः इत्यादीनां ज्ञानं मुल्याकलनमाध्यमेन एव भवति।

**परिभाषा-**

१. प्रत्येक गतिविधि अनन्तरं व्यवहारास्य परीक्षणं वीक्षणं निरीक्षणं च मूल्याकलनं कथ्यते यत् अधिगमपरिष्काराय भवति।
२. वार्षिकमूल्याङ्कनात् प्राक् याः क्रिया सम्पाद्यते ये व्यवहाराः आचार्यन्ते तस्य सर्वस्य अवलोकनं मूल्याकलनं कथ्यते।

**मूल्याकलनस्यकार्याणि (Functions of Assessment )**

१. संरचनात्मकम्
२. प्रक्रियोन्मुखी
३. निदानात्मकम्
४. उपचारात्मकशिक्षणस्य लक्षणज्ञानम्

**मूल्याकलन सन्दर्भाः ( Context of Assessment )**

वस्तुतः मूल्याकलनसन्दर्भाः अवसादस्य स्थितिः नास्ति अपितु मूल्याकलनं नाम कश्चन सदृशः प्रभावः यः उच्चशिक्षायाम् अध्ययनरतेभ्यः छात्रेभ्यः अपितु शिक्षकेभ्यः अपि सहाय्यं प्रददाति । यत् कथम् अनुशासनात्मकरुपेण मूल्याकलन प्रारुपस्य निर्माणं करोति । मूल्याकलनसन्दर्भाः इत्यस्य घनिष्ठ सम्बन्धः मूल्याकलनस्य उद्देश्येन सः वर्तते । मूल्याकलनसन्दर्भाः इत्यस्य वास्तविकार्थः भवति । कस्मिन् सन्दर्भे अस्माभिः छात्राणां मूल्याकलनं तथा शिक्षकेण स्वीय च मूल्याकलनं क्रियते । यथा –

**अधिगमार्थं मूल्याकलनम् –**

अधिगमार्थं मूल्याकालनं सा प्रक्रिया वर्तते यया अधिगमपरीस्थितीनां तथा शिक्षणानुभवेषु प्रयोक्षमाणां समस्तविधि प्रविधिनां च उपादेयताया परीक्षणं क्रियते । या प्रक्रिया छात्राणां सूचनधारिता भवति ।

१. अत्र शब्दिकाशाब्दिकरुपेण प्रतिपुष्टिः प्रदीयते ।
२. अस्मिन् अधिगमावबोधावसरे अध्यापकः स्वस्य तथा छात्राणां मूल्याकलनं करोति । यत् छात्राः समुचितदिशायां गच्छन्ति न वा ।
३. मूल्याकलनेऽस्मिन् श्रेण्यः अङ्काश्च न प्रदीयन्ते । पुनश्च प्राथमिक तथा वास्तविक लेखाः संचीयते ।

**अधिगमस्य मूल्याकलनम् –**

अधिगमप्रक्रियायाः अनन्तरं क्रियमाणं मूल्याकलनम् इति । अत्र छात्रेण कियत् अधिगमे सफलता प्राप्ता पुनश्च स्वस्य शिक्षणप्रक्रियायां छात्राणां अवबोधनं कियत् जातम् इत्यस्य मूल्याकलनं शिक्षकः करोति ।

१. अधिगमस्य एककस्य (Unit) समापने मूल्याकलनं क्रियते।

२. मूल्याकलनेऽस्मिन् श्रेण्यः अङ्काश्च प्रदीयन्ते।

३. मनकैः सह छात्रोपलब्धेः तुलना क्रियते।

४. परिणामः अभिभावकेभ्यः छात्रेभ्यश्च प्रदीयते।

****

हिन्दीधारा

# शिक्षा मनुष्य के जन्मगत अधिकार

**देवानन्द राणा**
शिक्षाशास्त्री प्रथमवर्ष
अनुक्रमाङ्क - 808

हमारे जीवन मे शिक्षा का महत्व शुरु से ही रहा है। शिक्षा हर एक नागरिक की एक ऐसी आवश्यकता है जिसके बिना कोई भी नागरिक जिंदगी मे कुछ खास नहीं कर पाता है। इस विषय मे कहावत है -शिक्षा के बगैर मनुष्य एक पशु समान है।

हमारे देश में शिक्षा प्राप्त करने के लिए बहुत सारे स्कूल- काँलेज बनाये गए है, हर तरह से उन स्कूल- काँलेजों में बच्चों को उचित शिक्षा दिलवाने के लिए बहुत सारी सुविधायों दी जा रहीं है। आज इस जमानें में शिक्षा को तेजी से फैलाने के लिए सरकार के द्वारा हर शहर हर गली हर गाँव में बहुत से स्कूल खोले गये हैं – क्योंकी कहते है कि

पढ़ेगा इंडिया तभी बढ़ेगा इंडिया।

हमारे देश के लोग पहले की अपेक्षा शिक्षा के महत्व को समझ चुके है। आज सिर्फ पुरुष ही नहीं स्त्रियां भी इस दौड़ में आगे बड़ रही है।

आज हमारे देश के महान लोगों ने बहुत तरक्की हासिल की उन्होनें अपने देश का नाम रोशन किया  इसका अगर सबसे महत्वपूर्ण कोई कारण है तो वह है उनको दी जाने वाली उचित शिक्षा। हमारे देश के प्रत्येक नागरिक को शिक्षा लेनें का अवसर दिया जाता है। पहले के ज़माने में शिक्षा प्राप्त करनें के अवसर कम होते थे लकिन आजकल छात्रवृत्ति की सुविधा दी जा रही है।

हमारे देश के राष्ट्रपति “ ए.पी.जे अब्दुल कलाम “ जोकि गरीब थे। लेकिन उन्होनें पढ़ाई की और पढ़ाई के महत्व को समझते हुए अपना पूरा ध्यान अपनी पढ़ाई पर दिया और अपने लगातार किये गए प्रयासो से उन्होनें बहुत सारे आविष्कार किये। इन्होने अपने देश का नाम रोशन किया और हमारे भारत देश के राष्ट्रपति बनें। अगर ये सब वो कर पायें है तो इसमें सबसे बड़ा योगदान उनकी शिक्षा का है क्योंकि - शिक्षा के बगैर इंसान कुछ भी खास नहीं कर पाता।

हमारे देश में गरीबी,जनसंख्या,भ्रष्टाचार जैसी बहुत सी समस्याएँ हैं लेकिन आजकल के लोगों को उच्च शिक्षा प्रदान करने के अवसर मिलते हैं, जिससे यह समस्याएँ तेजी से कम होती जा रही है। शिक्षा जिंदगी के ही क्षेत्र का एक महत्वपूर्ण अंग है, बहुत से लोग ऐसे होते है वह सोचते है कि मुझे अच्छी शिक्षा नहीं प्राप्त करनी है, क्योंकि कोई नौकरी नहीं करना चाहता हूं लेकिन यह सोच बिल्कुल गलत है क्योंकि शिक्षा का मतलब यह नहीं कि शिक्षा प्राप्त करके अच्छी नौकरी करें बल्कि शिक्षा का उद्देश्य आपको ज्ञान प्रदान करना है – जिससे आप किसी भी क्षेत्र में उन्नति कर सकें।

****

## छात्र जीवन में शिक्षक का महत्व

**श्रीकान्त नायक**
शिक्षाशास्त्रि प्रथमवर्ष
अनुक्रमाङ्क – 820

प्रत्येक व्यक्ति संसार में जन्म तो ईश्वर की कृपा से प्राप्त करता है, लेकिन जीवन को सार्थक और समृद्ध बनाने का शतप्रतिशतकार्य एक शिक्षक ही करता है। इसीलिए शिक्षक को समाज का दर्पण भी माना जाता है। क्योंकि व्यक्ति को समाज में किस प्रकार से रहना (जीवन यापन करना) है, अर्थात् समाज के अनुकूल आचरण का ज्ञान एक बालक शिक्षक से ही प्राप्त करता है। माता पिता के पश्चात् जीवन में शिक्षक का स्थान सर्वोपरि (श्रेष्ठ) माना जाता है।

इसी कारण शिक्षक का महत्व हमारे ग्रन्थों में भी प्रदर्शित किया गया है। शिक्षक को परब्रह्म शब्द से भी सम्बोधित किया गया है-

गुरुर्ब्रह्मा गुरुर्विष्णु गुरुर्देवो महेश्वरः।

गुरुर्साक्षात् परब्रह्म तस्मै श्री गुरवे नमः॥

इस श्लोक से यह ज्ञात होता है,कि गुरु अर्थात् शिक्षक की वाणी का महत्व होता है, यह शास्त्र प्रमाण है,और वास्तविकता भी यही है कि शिक्षक द्वारा प्रदान की गई शिक्षा के माध्यम से ही कोई भी छात्र अथवा व्यक्ति इस समाज में सम्मानजनक स्थान प्राप्त करते हुये अपने जीवन को सार्थक बना पाता है। इस से यह ज्ञात होता है कि एक राष्ट्र की उन्नति में अदृश्य रुप से शिक्षक का हाथ हमेशा होता है। क्योंकि शिक्षक द्वारा प्रेरित होकर छात्र (बालक) उत्तम मार्ग का अनुसरण करते हुये ही व्यवसायिक क्षेत्र,सामाजिक कार्यों, (समाजहित) राजनीति क्षेत्र में प्रवेश करता है और वहाँ पर शिक्षक द्वारा प्रदान शिक्षा के माध्यम से ही अपने कार्य को उन्नति कि ओर अग्रेसित करता है। जिससे राष्ट्र की उन्नति होती है।

****

## आखिर कैसी हो शिक्षा ?

कार्तिक मिश्रा
शिक्षाशास्त्रि प्रथमवर्ष
अनुक्रमाङ्क: - 834

प्रिय पाठकों ! हम सभी के मन में आज शिक्षा को लेकर अनेक प्रश्न और संशय हैं, कि आखिर शिक्षा प्राप्त करने का मतलब क्या है?

पहला  सवाल है कि क्या शिक्षा प्राप्त करने का अर्थ गगनचुम्बी इमारतों वाले तथा धनापेक्षित संस्थानो में प्रवेश लेना और माता-पिता के पैसों से अय्याशी करना है? अथवा निम्नस्तरीय सरकारी विद्यालयों में असुविधाओं को झेलते हुए पठन करना है उसी प्रकार दूसरा प्रश्न यह है कि क्या पूरी तरह से आधुनिकता तथा पाश्चात्य संस्कृति को अपनाना और आधुनिक विद्यालयों में ज्ञान पाना है, या फिर आधुनिकता को बिल्कुल त्यागकर गुरुकुल पद्धति से पढ़ना शिक्षा प्राप्त करना है?

प्रस्तुत प्रश्नों के आधार पर हम साम्प्रतिक शिक्षा को दो स्तरों पर दो-दो भागों में बाँटकर प्रश्नों पर विचार करेंगे।

**१.धन के स्तर पर**

**(क)** अमीरों की शिक्षा।      **(ख)** गरीबों की शिक्षा।

**२.समय के स्तर पर**

**(अ)** आधुनिक शिक्षा        **(आ)** पौरस्त्य शिक्षा

अभी हमारे सम्मुख दो स्तर हैं, उनमें सर्वप्रथम **धन के स्तर** पर बात करें तो वर्तमान में हम सब यह देखतें हैं कि जिसे जितनी अच्छी शिक्षा पानी है, उसे उतना ही अधिक धन खर्च करना पङता है और उसी के आधार पर उन्हें भविष्य में सुअवसर भी प्राप्त होते हैं, लेकिन जिनके पास धन का अभाव है वे लोग प्रायः अपनी गरीबी के कारण केवल एक संघर्षमय जीवन ही जी पाते हैं। हम यहाँ १०० प्रतिशत अमीरों या गरीबों की बात नहीं कर रहे हैं, बल्कि उनमें से अधिकांश लोगों की बात कर रहे हैं। उदाहरण के तौर पर मान लीजिए कि एक बहुत ही प्रसिद्ध और धनापेक्षित संस्थान है और वहाँ वित्तशाली लोगों के बच्चे प्रवेश ले

लेते हैं, किन्तु वे बच्चे वहाँ पढ़ते हैं, या नहीं यह बात अधिक महत्वपूर्ण नहीं है, महत्वपूर्ण है उनका उस तथाकथित संस्थान में पढ़ना। समय के साथ-साथ बडी-बडी कम्पनियाँ उस संस्थान में आती है और इस कारण वहाँ के बच्चों को अच्छे पद भी प्राप्त हो जाते हैं। लेकिन यही लोग जब उच्च पदों को प्राप्त कर लेते हैं तो वहाँ उनको धन की नहीं उस पद के लिए उपयुक्त ज्ञान और अनुभव की आवश्यकता होती है, जिसके लिए उन्होनें कभी मेहनत की ही नहीं होती है। अब ये उच्च पदों पर बैठे लोग हमारी और देश की कैसे उन्नति कर पायेंगे ? यह प्रश्न उठता है। दूसरी ओर वे बच्चे भी हैं जो बुद्धिमान तो हैं परन्तु धनवान नहीं, और इसी कारण देश की उन्नति कहीं न कहीं एक छोटे से संघर्षमय जीवन में दब कर रह जाती है। इसलिए इस महती समस्या का समाधान यही है कि सभी क्षेत्रों की संस्थाएँ कम से कम स्नातक स्तर तक केवल सरकारी ही हो और उनकी व्यवस्था तथा रखरखाव अपेक्षित परिस्थिति के अनुकूल हो एवं प्रतिभावान बच्चों के स्नातक से आगे पढ़ने के लिए उचित छात्रवृत्ति की व्यवस्था हो। यदि ऐसा हो जाता है तो जो बच्चे प्रतिभावान होंगे, वे स्नातक स्तर के बाद स्वयं के बलबूतें पर आगे बढ़ने में समर्थ हो ही जायेंगे। अब जो श्रीमान लोग हैं, जिनकी अनेक निजी शिक्षा संस्थाएँ हैं वे लोग केवल स्नातक स्तर के बाद के स्तरों पर ही संस्थाएँ खोल पायेंगे और उस संस्था को चलाने के लिए उन्हें जिस राजकीय अनुमति की आवश्यकता होती है, उसे प्राप्त करने के लिए उन्हें भारी मात्रा में धन राशि देनी होगी और उस राशि का उपयोग इन सरकारी संस्थाओं के विकास के लिए होगा। इससे प्रत्येक वर्ग के लोग अपेक्षित शिक्षा ले पायेंगे और उनमें एकता की भावना आयेगी। बच्चों के साथ में रहने से उनमें सामंजस्य, बौद्धिकचिन्तन तथा सर्जनात्मकता का विकास होगा और इस प्रकार देश का हर दृष्टिकोण से विकास होगा, अन्यथा देश ऐसे ही वर्गों,धर्मों और सम्प्रदायों में बँटता रहेगा। गरीब और भी गरीब तथा अमीर और अधिक अमीर होता चला जायेगा, देखतें ही देखतें देश खत्म हो जायेगा।

अब **समय के स्तर** पर यदि बात करें तो आज भारत में लोग रहते तो हैं लेकिन भारतीय हैं यह कहना मुश्किल हैं, क्योंकि उनमें भारतीयता ही नहीं है। सब लोग आधुनिकता में इतना खो चुके हैं कि उन्हें अपना अतीत तक याद नहीं रहा। किन्तु हम यह भी नहीं कह सकते हैं कि पूरी तरह आधुनिक शिक्षा छोडकर गुरुकुलीय पद्धति को अपना लिया जायें, क्योंकि  वर्तमान के साथ चलना और आधुनिकता से जुडे रहना भी बहुत आवश्यक है। अतः क्यों न शिक्षा का एक ऐसा रास्ता निकाला जाये जहाँ आधुनिकता और भारतीयता दोनों भरपूर हों। यदि शिक्षा के लिए ऐसे माध्यम निकाले जाते हैं तो भारत को हमेशा और हमेशा के लिए आगे बढ़ने से कोई नहीं रोक पायेगा।

****

## नाटक शिक्षण

**विनय कुमार शुक्ल**
शिक्षा शास्त्रि प्रथमवर्ष
अनुक्रमांक - 846

मनुष्य एक सामाजिक प्राणी है,और मनुष्य का सबसे बड़ा गुण होता है, अनुकरण करना। वही उसकी स्वाभाविक प्रवृत्ति है।इस प्रवृत्ति के कारण मनुष्य दूसरों का अनुकरण करके अपने को व्यक्त करने की कोशिश करने का प्रयास करता है। जब मनुष्य के इस अनुकरण को कथोपकथन, वार्तालाप, संगीत, नृत्य, कला, वेशभूषा एवं भाव-भंगिमा आदि से सम्बंधित कर दिया जाता है तो मनुष्य की उस प्रवृत्ति को अथवा अवस्था को नाट्य का रूप दे देते है,और तभी नाटक का समारम्भ होता है। **अवस्थानुकृतिर्नाट्यम् । रूपकं तत्समारोपात् ।। दशरूपक-1-7**

साहित्य में नाटकों का विशेष महत्व है।साहित्य को गौरवान्वित करने का समस्त श्रेय नाटकों को ही जाता है।नाटक को काव्य से अधिक प्रतिष्ठा प्राप्त हुई है -**"काव्येषु नाटकं रम्यम्"**।नाटक में पर्दे,वेशभूषा एवं अभिनय आदि के माध्यम से ही आनन्दानुभूति होती है।आनन्दानुभूति के लिए उक्त विविध विधान स्वयं ही वातावरण को उत्पन्न कर देते है।क्योंकि नाटक में अभिनय की प्रधानता होने के कारण अधिक हृदयग्रहीता,मनोरंजकता,आकर्षकता,भावाभिव्यंजना एवं विषय-विविधता होती है।

नाटक जनसाधारण के लिए सार्वजानिक मनोरंजन का साधन है।यह समाज के लिए विशेष उपादेय है। भरतमुनि ने लिखा है -

**न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।**

**नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते ॥**

**नाट्यशास्त्र-1-16**

कोई भी ज्ञान,शिल्प,कला,विद्या,योग,कर्म,ऐसा नहीं है,जो नाटक से परिलक्षित न हो।

नाटक दृश्य काव्य है,जिसकी अनुभूति अभिनय के माध्यम एवं प्रत्यक्षावलोकन से होती है।नाटक मनोरंजन मात्र ही नही अपितु वे कल्याणकारी मार्ग की ओर मानव को प्रवृत्त करते है।क्योंकि नाटक का प्रकृति के साथ घनिष्ठ संबंध रहता है,और रूसो महोदय ने "**प्रकृतिमनुसार**"(प्रकृति का अनुसरण करो)प्रकृति से ज्ञान प्राप्ति का मार्ग बतलाया है।इसके अलावा श्रेष्ठ नाटक के विषय को "**भवभूति**" ने प्रतिपादित किया है-

**भूम्ना रसानां गहना: प्रयोगा:,सौहार्द्रहृद्यानि विचेष्टितानि।**

**औध्दत्यमायोजितकामसूत्रं, चित्रा: कथा वाचि विदग्धता च ॥**

मालतीमाधव-1-6

विभिन्न रसों का प्रचुर और प्रगाढ़ प्रयोग,सौहार्द्र पूर्ण हृदयग्राही कार्यकलापों का अभिनय,पराक्रम और प्रणय का चित्रण,विचित्र कथावस्तु तथा विदग्धतापूर्ण संवादों से युक्त नाटक ही उत्कृष्ट कोटि के माने जाते है।नाटक शिक्षण मनुष्य के जीवन में बहुत ही महत्त्व पूर्ण भूमिका का निर्वहण करते है।यथा- नायक नायिकाओं के आदर्श चरित्र का अनुकरण कर मनुष्यों का चारित्रिक विकास कराना। जैसे - राम सीता के चरित्र का वर्णन ।

नाटक हर वर्ग ,श्रेणी,जाति आदि समस्त देहधारियों के विकास का एक उपक्रम है । छात्रों के शिक्षण लिए के लिए नाटक वरदान स्वरूप है। नाटक के माध्यम से छात्रों को विविध प्रकार के जीवन दर्शन का प्रतिनिधित्व करने वाले पात्रों का चरित्र चित्रण दिखाकर तदनुरूप अपना जीवन - दर्शन बनाने के लिए प्रेरित करना।जैसे- स्वामी विवेकानन्द, रामकृष्ण परमहंस,चाणक्य,रानी लक्ष्मीबाई,भगत सिंह ,चन्द्रशेखर आजाद इत्यादि।

****

## शिक्षण सिद्धान्त

**जयदेव साहु**
शिक्षाशास्त्री द्वितीयवर्ष
अनुक्रमाङ्क – 947

प्रत्येक अध्यापक की हार्दिक इच्छा होती है कि उसका शिक्षण प्रभावपूर्ण हो । इसके लिये अध्यापक को कई बातों को जानकर उन्हे व्यवहार में लाना पड़ता है, यथा - पाठ्यवस्तु का आरम्भ कहां से किया जाय, किस प्रकार किया जाय, छात्र इसमें रुचि कैसे लेते रहें, अर्जित ज्ञान को बालकों के लिये उपयोगी कैसे बनाया जाय, आदि। शिक्षाशास्त्रियों ने

अध्यापकों के लिये इन आवश्यक बातों पर विचार करके अनेक सिद्धान्तों का प्रतिपादन किया है, जिनमें से प्रमुख निम्नलिखित हैं -

**(१) क्रिया द्वारा सीखने का सिद्धान्त**

बालक स्वभावतः ही क्रियाशील होते हैं। निष्क्रिय बैठे रहना उनकी प्रकृति के विपरीत है। उन्हे अपने हाथ, पैर व अन्य इन्द्रियों को प्रयोग में लाने में अत्यन्त आनन्द की प्राप्ति होती है। स्वयं करने की क्रिया द्वारा बालक सीखता है। इस प्रकार से प्राप्त किया हुआ ज्ञान अथवा अनुभव उसके व्यक्तित्व का स्थाई अंग बन कर रह जाता है। अतः अध्यापक का अध्यापन इस प्रकार होना चाहिए जिससे बालक को 'स्वयं करके सीखने' का अधिकाधिक अवसर मिलें।

**(२) जीवन से सम्बद्धता का सिद्धान्त**

अपने जीवन से सम्बन्धित वस्तुओं का ज्ञान प्राप्त करना बालकों की स्वाभाविक रुचि होती है। अतः पाठ्यवस्तु में जीवन से सम्बन्धित तथ्यों को ही शामिल करना चाहिये अर्थात् वास्तविक जीवन की वास्तविक परिस्थितियों से लिये गये तथ्यों को ही शामिल करना चाहिये। यदि अध्यापक काल्पनिक अथवा जीवन से असम्बन्धित तथ्यों को ही पढ़ाना चाहेगा तो छात्रों की रुचि उससे हट जायेगी।

**(३) हेतु प्रयोजन का सिद्धान्त**

जब तक बालकों को पाठ का हेतु अथवा उद्देश्य पूर्णतया ज्ञात नहीं होता है, वे उसमे, पूर्ण ध्यान नहीं दे सकते। केवल पाठ का उद्देश्य जान लेने से भी काम नहीं चलता। यदि पाठ का उद्देश्य बालकों की रुचि को प्रेरणा देने वाला हुआ तो उनका पूरा ध्यान उस पाठ को सीखने में लगता है।

**(४) चुनाव का सिद्धान्त**

मनुष्य का जीवनकाल अत्यन्त कम है,और ज्ञान का विस्तार असीम है । अतः पाठ्यसामग्री में संसार की अपार ज्ञानराशि में से अत्यन्त उपयोगी वस्तुओं को चुनकर रखा जाना चाहिये।

**(५) विभाजन का सिद्धान्त**

सम्पूर्ण पाठ्यवस्तु बालक के सम्मुख एकसाथ नहीं प्रस्तुत की जा सकती । उसे उचित खण्डों, अन्वितियों अथवा इकाइयों में विभक्त किया जाना चाहिये। अन्वितियां ऐसी हों जैसी कि सीढ़ियां होती हैं। इन्हें जैसे-जैसे बालक पार करता जाये, वह उन्नति करता जाये।

**(६) पुनरावृत्ति का सिद्धान्त**

बालक किसी पाठ्यवस्तु अथवा ज्ञान को अपने मस्तिष्क में ठोस प्रकार से तभी जमा कर सकता है जब बार-बार उसकी आवृत्ति करायी जाय।

****

# उधम सिंह

नवदीप शर्मा
शिक्षाशास्त्री द्वितीयवर्ष
अनुक्रमाङ्क - 926

उद्देश्य एक पूर्वदर्शित लक्ष्य है । जो किसी क्रिया को संचालित करता है अथवा व्यवहार को प्रेरित करता है । यदि व्यक्ति का लक्ष्य स्पष्ट होता है तो वह लक्ष्य प्राप्ति तक उत्साहपूर्वक प्रयासरत रहता है। मानव जीवन के प्रत्येक पक्ष तथा दैनिक जीवन की प्रत्येक

क्रिया को सफल बनाने के उद्देश्य का विशेष महत्त्व होता है। बिना उद्देश्य के हम जीवन के किसी भी क्षेत्र में सफल नहीं हो सकते। जब किसी व्यक्ति को किसी उद्देश्य का स्पष्ट ज्ञान होता है तो उसके मन में दृढता और आत्मबल जागृत होता है। इससे वह एकाग्र होकर अपने कार्यों को पूरे उत्साह से करने लगता है।

भारत की एक ऐसी दर्दनाक घटना जो चिरस्मरणीय है, जलियावाला बाग हत्याकाण्ड सर्वविदित है कि उस दिन अमृतसर के हजारों लोग अपने वैसाखी पर्व को मनाने तथा रोलेट एक्ट का शान्तिपूर्वक विरोध प्रदर्शन के लिए एकत्रित हुए। उस दिन बिना चेतावनी दिए जनरल डायर ने हजारों निर्दोषों पर अन्धाधुन्ध गोलियां चलवा दी। मरने के डर से लोग इधर-उधर भागने लगे।उस भगदड़ में कई लोग दब कर और अधिकाधिक गोलियों की चपेट में आकर मर गए। इर प्रकार हजारों की संख्या में निर्दोष लोगों की जानें चली गई। जो बचे थे वे अपने प्राणों की रक्षा के लिए वहां स्थित कुएँ में कूद गए। लोगों की चीखें, बच्चों का क्रन्दन एक कठोर हृदय वाले पुरुष के हृदय को भी द्रवित कर सकतीं थ। उस घटना ने एक ऐसे क्रान्तिवीर को जन्म दिया जिसने आजादी को प्राप्त करने की परिभाषा को ही बदल दिया। एक ऐसा क्रान्तिवीर जिसने अपने सैकडों भाईयों की मौत का प्रतिशोध लेने के लिए एक ऐसा अनूठा संकल्प लिया जिसका किसी को भान न था। ऐसा वीर जिसने अपने जीवन की सार्थकता केवल उस हत्यारे से बदला लेने में समझी। उसने जनरल डायर को मारना ही अपने जीवन का सबसे बड़ा लक्ष्य समझा। जलियावाला बाग के उस नरसंहार में जिस सूर्यरूपी क्रान्तिवीर का उदय हुआ उसका नाम उधम था।

उधम सिंह का जन्म पंजाब के संगरूर जिले के सुनाम गाँव के कम्बोज परिवार में हुआ। उधम सिंह 13 अप्रैल 1919 में घटित जलियावाला बाग के प्रत्यक्षदर्शी थे। इस घटना से उधम सिंह तिलमिला गए और जलियावाला बाग की मिट्टी हाथ में लेकर डायर को सबक

सिखाने की प्रतिज्ञा ले ली। अपने लक्ष्य को अंजाम देने के लिए उधम सिंह ने विभिन्न नामों से अफ्रिका, नैरोबी, ब्राजील और अमेरिका की यात्रा की। सन् 1934 में उधम सिंह लंदन पहुंचे और वहाँ 9, एल्डर स्ट्रीट कमर्शियल रोड़ पर रहने लगे। वहां उन्होनें यात्रा के उद्देश्य से एक कार खरीदी। भारत का क्रान्तिवीर डायर को ठिकाने लगाने के लिए उचित समय की प्रतीक्षा करने लगा।

उधम सिंह को अपने सैकड़ों भाई-बहिनों की हत्या का प्रतिशोध लेने का अवसर 1940 में मिला। जलियावाला बाग हत्याकाण्ड के 21 साल बाद 13 मार्च 1940 को रोयल सेन्ट्रल एशियन सोसायटी की लंदन के कोक्सटन हाल में बैठक थी जहाँ माइकल ओ डायर भी वक्ताओं में से एक था। उधम सिंह उस दिन समय से ही बैठक स्थल पर पहुँच गए। अपनी रिवाल्वर उन्होंने मोटी पुस्तक में छिपा ली। इसके लिए उन्होंने पुस्तक के पृष्ठों को रिवोल्वर के आकार में काट लिया था, जिससे डायर की जान लेने वाला हथियार आसानी से छिपाया जा सके।

बैठक के बाद दीवार के पीछे से मोर्चा संभालते हुए उधम सिंह ने माइकल ओ डायर पर गोलियां दाग दी। दो गोलियां डायर को लगी जिससे तत्काल ही उसकी मौत हो गई। उधम सिंह ने वहां से भागने की कोशिश नहीं की अपितु अपनी गिरफ्तारी दी। उस पर मुकदमा चला और 4 जून 1940 को पेंटनविले जेल में फांसी दे दी गई।

इस प्रकार उधम सिंह ने वो कर दिखाया जिसके बारे में सोचना भी असंभव था। उद्देश्य प्राप्ति के लिए इरादा अटल होना चाहिए फिर चाहे उसमें कितनी कठिनाइयां ही क्यों न आएँ।

****

# आङ्लधारा

# OUR JOURNEY

**Trupti Sahu**
Shiksha Shastri 1$^{st}$ year
Roll no-803

We came with fear
By not knowing anybody
But we go with tears
Knowing everybody.

We make many friends
With covalent bonds
And the moments we spent
Just like electrons.

True those friends
Were hard to find
But once found
They settled in our minds.

We became friends
Without communication
And we loved them a lot
Without limitation.

We have a package of feelings
Nobody can explain it
God has given us hearts
Only we can feel it.

Last but we say
With full of emotions
It's impossible to forget
Our SRINGERIAN memory.

*****

# CAN ONLINE LEARNING SUBSTITUTE CLASSROOM LEARNING?

**T.K. KaushikRao**
ShikshaShastri 1st year
Roll no. 804

